ॐ

ब्रह्मसूत्र शाङ्करदिग्विजय

हस्तलिखित

॥ ॐ ॥

॥ ब्रह्मसूत्र ॥

॥ अथ प्रथमाध्यायस्य प्रथमः पादः ॥ १ ॥

अथातो ब्रह्मजिज्ञासा ॥ १ ॥ जन्माद्यस्य-
यतः ॥ २ ॥ शास्त्रयोनित्वात् ॥ ३ ॥ तत्तु-
समन्वयात् ॥ ४ ॥ ईक्षतेर्नाशब्दम् ॥
॥ ५ ॥ गौणश्चेन्नात्मशब्दात् ॥ ६ ॥ तन्नि-
ष्ठस्य मोक्षोपदेशात् ॥ ७ ॥ हेयत्वाव-
चनाच्च ॥ ८ ॥ स्वाप्ययात् ॥ ९ ॥ गति-
सामान्यात् ॥ १० ॥ श्रुतत्वाच्च ॥ ११ ॥
आनन्दमयोऽभ्यासात् ॥ १२ ॥ विका-
रशब्दान्नेति चेन्न प्राचुर्यात् ॥ १३ ॥
तद्धेतुव्यपदेशाच्च ॥ १४ ॥ मान्त्रवर्णि-
कमेव च गीयते ॥ १५ ॥ नेतरोऽनुपप-
त्तेः ॥ १६ ॥ भेदव्यपदेशाच्च ॥ १७ ॥
कामाच्च नानुमानापेक्षा ॥ १८ ॥ अस्मि-

अस्यचतद्योगंशास्ति ॥१९॥ अन्त-
स्तद्धर्मोपदेशात् ॥२०॥ भेदव्यपदेशा-
च्चान्यः ॥२१॥ आकाशस्तल्लिङ्गात् ॥
अतएवप्राणः ॥२३॥ ज्योतिश्चरणा-
भिधानात् ॥२४॥ छन्दोऽभिधाना-
न्नेतिचेन्नतथाचेतोऽर्पणनिगदात्त-
थाहिदर्शनम् ॥२५॥ भूतादिपादव्य-
पदेशोपपत्तेश्चैवम् ॥२६॥ उपदेश-
भेदान्नेतिचेन्नोभयस्मिन्नप्यविरो-
धात् ॥२७॥ प्राणस्तथानुगमात् ॥
नवक्तुरात्मोपदेशादितिचेदध्या-
त्मसंबन्धभूमाह्यस्मिन् ॥२८॥ शा-
स्त्रदृष्ट्यात्पदेशोवामदेववत् ॥३०॥
जीवमुख्यप्राणलिङ्गान्नेतिचेन्नोपास-
त्रैविध्यादाश्रितत्वादिहतद्योगात् ॥
॥३१॥ इतिप्रथमःपादःसमाप्तम् ॥

अथप्रथमाध्यायस्यद्वितीयःपादः

सर्वत्रप्रसिद्धउपदेशात्॥१॥विवक्षि-
तगुणोपपत्तेश्च॥२॥अनुपपत्तेस्तुन-
शारीरः॥३॥कर्मकर्तृव्यपदेशाच्च॥
॥४॥शब्दविशेषात्॥५॥स्मृतेश्च॥
अर्भकौकस्त्वात्तद्व्यपदेशाच्चनेति-
चेन्ननिचाय्यत्वादेवंव्योमवच्च॥७॥
संभोगप्राप्तिरितिचेन्नवैशेष्यात्॥
अत्ताचराचरग्रहणात्॥९॥प्रकरणा-
च्च॥१०॥गुहांप्रविष्टावात्मानौहितद्-
दर्शनात्॥११॥विशेषणाच्च॥१२॥अ-
न्तरउपपत्तेः॥१३॥स्थानादिव्यप-
देशाच्च॥१४॥सुखविशिष्टाभिधा-
नादेवच॥१५॥श्रुतोपनिषत्कगत्य-
भिधानाच्च॥१६॥अनवस्थितेरसंभ-
वाच्चनेतरः॥१७॥अन्तर्याम्यधिदै-

वादिषुतद्धर्मव्यपदेशात्॥१८॥नच
स्मार्तमतद्धर्माभिलापात्॥१९॥शा
रीरश्चोभयेऽपिहिभेदेनैनमधीयते॥
॥२०॥अदृश्यत्वादिगुणकोधर्मोक्तेः॥
२१॥विशेषणभेदव्यपदेशाभ्यांचने
तरौ॥२२॥रूपोपन्यासाच्च॥२३॥वैश्वा
नरःसाधारणशब्दविशेषात्॥२४॥
स्मर्यमाणमनुमानंस्यादिति॥२५॥
शब्दादिभ्योऽन्तःप्रतिष्ठानाच्चनेति
चेन्नतथादृष्ट्युपदेशादसंभवात्पुरु
षमपिचैनमधीयते॥२६॥अतएवनदे
वताभूतंच॥२७॥साक्षादप्यविरोधं
जैमिनि॥२८॥अभिव्यक्तेरित्याश्मर
थ्यः॥२९॥अनुस्मृतेर्बादरिः॥३०॥सं
पत्तेरितिजैमिनिस्तथाहिदर्शयति॥
आमनन्तिचैनमस्मिन्॥३२॥इतिद्वि

तीयः पादः समाप्तम् ॥२॥

॥ अथ प्रथमाध्यायस्य तृतीयः पादः ॥३॥

द्युभ्वाद्यायतनं स्वशब्दात् ॥१॥ मुक्तो-
पसृप्यव्यपदेशात् ॥२॥ नानुमानम-
तच्छब्दात् ॥३॥ प्राणभृच्च ॥४॥ भेद-
व्यपदेशाच्च ॥५॥ प्रकरणात् ॥६॥ स्थि-
त्यदनाभ्यां च ॥७॥ भूमा संप्रसादाद-
ध्युपदेशात् ॥८॥ धर्मोपपत्तेश्च ॥९॥
अक्षरमम्बरान्तधृतेः ॥१०॥ सा च प्रशा-
सनात् ॥११॥ अन्यभावव्यावृत्तेश्च ॥१२॥
ईक्षतिकर्मव्यपदेशात्सः ॥१३॥ दहर-
उत्तरेभ्यः ॥१४॥ गतिशब्दाभ्यां तथा-
हि दृष्टं लिङ्गं च ॥१५॥ धृतेश्च महिम्नो-
ऽस्यास्मिन्नुपलब्धेः ॥१६॥ प्रसिद्धे-
श्च ॥१७॥ इतरपरामर्शात्स इति चेन्ना-
संभवात् ॥१८॥ उत्तराच्चेदाविर्भूत-

स्वरूपस्तु॥१९॥अन्यार्थश्चपरामर्शः॥
॥२०॥अल्पश्रुतेरितिचेत्तदुक्तम्॥
अनुकृतेस्तस्यच॥२२॥अपिचस्मर्य-
ते॥२३॥शब्दादेवप्रमितः॥२४॥हृ-
द्यपेक्षयातुमनुष्याधिकारत्वात्॥
तदुपर्यपिबादरायणःसंभवात्॥२६॥
विरोधःकर्मणीतिचेन्नानेकप्रतिप-
त्तेर्दर्शनात्॥२७॥शब्दइतिचेन्नातः
प्रभवात्प्रत्यक्षानुमानाभ्याम्॥२८॥
अतएवचनित्यत्वम्॥२९॥समानना-
मरूपत्वाच्चावृत्तावप्यविरोधोदर्श-
नात्स्मृतेश्च॥३०॥मध्वादिष्वसंभ-
वादनधिकारंजैमिनिः॥३१॥ज्योति-
षिभावाच्च॥३२॥भावंतुबादरायणो-
ऽस्तिहि॥३३॥शुगस्यतदनादरश्र-
वणात्तदाद्रवणात्सूच्यतेहि॥३४॥

क्षत्रियत्वगतेश्चोत्तरत्रचैत्ररथेनलि-
ङ्गात्॥३५॥संस्कारपरामर्शात्तदभा-
वाभिलापाच्च॥३६॥तदभावनिर्धा-
रणेचप्रवृत्तेः॥३७॥श्रवणाध्ययना-
र्थप्रतिषेधात्स्मृतेश्च॥३८॥कम्पना-
त्॥३९॥ज्योतिर्दर्शनात्॥४०॥आ-
काशोऽर्थान्तरत्वादिव्यपदेशात्॥
॥४१॥सुषुप्त्युत्क्रान्त्योर्भेदेन॥४२॥
पत्यादिशब्देभ्यः॥४३॥ इतितृती-
यः पादः समाप्तम्॥३॥
अथप्रथमाध्यायस्यचतुर्थः पादः॥४॥
आनुमानिकमप्येकेषामितिचेन्नश-
रीररूपकविन्यस्तगृहीतेर्दर्शयति
च॥१॥सूक्ष्मंतुतदर्हत्वात्॥२॥तद-
धीनत्वादर्थवत्॥३॥ज्ञेयत्वावच-
नाच्च॥४॥वदतीतिचेन्नप्राज्ञोहिप्रक-

रणात्॥५॥त्रयाणामेवचैवमुपन्या-
सः प्रश्नश्च॥६॥महद्वच्च॥७॥चमस-
वदविशेषात्॥८॥ज्योतिरुपक्रमा-
त्तुतथाह्यधीयतएके॥९॥कल्पनोप-
देशाच्चमध्वादिवदविरोधः॥१०॥
नसङ्ख्योपसङ्ग्रहादपिनानाभावाद-
तिरेकाच्च॥११॥प्राणादयोवाक्यशेषा-
त्॥१२॥ज्योतिषैकेषामसत्यन्ने॥१३॥
कारणत्वेनचाकाशादिषुयथाव्य-
पदिष्टोक्तेः॥१४॥समाकर्षात्॥१५॥
जगद्वाचित्वात्॥१६॥जीवमुख्यप्रा-
णलिङ्गान्नेतिचेत्तद्व्याख्यातम्॥१७॥
अन्यार्थंतुजैमिनिःप्रश्नव्याख्याना-
भ्यामपिचैवमेके॥१८॥वाक्यान्व-
यात्॥१९॥प्रतिज्ञासिद्धेर्लिङ्गमाश्म-
रथ्यः॥२०॥उत्क्रमिष्यतएवंभावा-

॥दित्यौडुलोमिः॥२१॥अवस्थितेरिति-
काशकृत्स्नः॥२२॥प्रकृतिश्चप्रतिज्ञा-
दृष्टान्तानुपरोधात्॥२३॥अभिध्यो-
पदेशाच्च॥२४॥साक्षाच्चोभयाम्ना-
नात्॥२५॥आत्मकृतेःपरिणामात्॥
॥२६॥योनिश्चहिगीयते॥२७॥एते
नसर्वेव्याख्याताव्याख्याताः॥२८॥
इतिप्रथमाध्यायस्यचतुर्थःपादः
समाप्तम्॥४॥प्रथमाध्यायःसमाप्तः॥

॥अथद्वितीयाध्यायस्यप्रथमःपादः॥

स्मृत्यनवकाशदोषप्रसङ्ग इतिचे-
न्नान्यस्मृत्यनवकाशदोषप्रसङ्गा-
त्॥१॥इतरेषांचानुपलब्धेः॥२॥एते-
नयोगः [redacted] प्रत्युक्तः॥३॥नवि-
लक्षणत्वादस्यतथात्वंचशब्दात्॥
॥४॥अभिमानिव्यपदेशस्तुविशे-

षानुगतिभ्याम्॥५॥दृश्यतेतु॥६॥
असदितिचेन्नप्रतिषेधमात्रत्वात्॥
अपीतौतद्वत्प्रसङ्गादसमञ्जसम्॥८॥
नतुदृष्टान्तभावात्॥९॥स्वपक्षदो-
षाच्च॥१०॥तर्काप्रतिष्ठानादप्यन्य-
थानुमेयमितिचेदेवमप्यविमोक्ष-
प्रसङ्गः॥११॥एतेनशिष्टापरिग्रहा-
अपिव्याख्याताः॥१२॥भोक्त्रापत्तेर-
विभागश्चेत्स्याल्लोकवत्॥१३॥त-
दनन्यत्वमारम्भणशब्दादिभ्यः
॥१४॥भावेचोपलब्धेः॥१५॥सत्त्वा-
च्चावरस्य॥१६॥असद्व्यपदेशान्ने-
तिचेन्नधर्मान्तरेणवाक्यशेषात्॥
॥१७॥युक्तेःशब्दान्तराच्च॥१८॥
पटवच्च॥१९॥यथाचप्राणादिः॥२०॥
इतरव्यपदेशाद्धिताकरणादिदोष-

प्रसक्तिः॥२१॥अधिकंतुभेदनिर्देशा-
त्॥२२॥अश्मादिवच्चतदनुपपत्तिः॥
उपसंहारदर्शनान्नेतिचेन्नक्षीरवद्धि
॥२४॥देवादिवदपिलोके॥२५॥कृ-
त्स्नप्रसक्तिर्निरवयवत्वशब्दको-
पोवा॥२६॥श्रुतेस्तुशब्दमूलत्वात्
॥२७॥आत्मनिचैवंविचित्राश्चहि
॥२८॥स्वपक्षदोषाच्च॥२९॥सर्वोपे-
ताचतद्दर्शनात्॥३०॥विकरणत्वा-
न्नेतिचेत्तदुक्तम्॥३१॥नप्रयोजनव-
त्त्वात्॥३२॥लोकवत्तुलीलाकैव-
ल्यम्॥३३॥वैषम्यनैर्घृण्येनसा-
पेक्षत्वात्तथाहिदर्शयति॥३४॥
नकर्माविभागादितिचेन्नानादि-
त्वात्॥३५॥उपपद्यतेचाप्युपल-
भ्यतेच॥३६॥सर्वधर्मोपपत्तेश्च॥

॥३७॥ इतिप्रथमः पादः समाप्तम् ॥१॥

॥ अथद्वितीयाध्यायस्यद्वितीयःपादः ॥

रचनानुपपत्तेश्चनानुमानम् ॥१॥ प्र-
वृत्तेश्च ॥२॥ पयोऽम्बुवच्चेत्तत्रापि ॥३॥
व्यतिरेकानवस्थितेश्चानपेक्षत्वात्
॥४॥ अन्यत्राभावाच्चनतृणादिवत् ॥
अभ्युपगमेऽप्यर्थाभावात् ॥६॥ पु-
रुषाश्मवदितिचेत्तथापि ॥७॥ अङ्गि-
त्वानुपपत्तेश्च ॥८॥ अन्यथानुमितौ-
चज्ञशक्तिवियोगात् ॥९॥ विप्रति-
षेधाच्चासमञ्जसम् ॥१०॥ महद्दीर्घ-
वद्वाह्रस्वपरिमण्डलाभ्याम् ॥११॥
उभयथापिनकर्मातस्तदभावः ॥
समवायाभ्युपगमाच्चसाम्यादन-
वस्थितेः ॥१३॥ नित्यमेवचभा-
वात् ॥१४॥ रूपादिमत्त्वाच्चविप-

र्ययोदर्शनात्॥१५॥उभयथाचदो-
षात्॥१६॥अपरिग्रहाच्चात्यन्तमन-
पेक्षा॥१७॥समुदायउभयहेतुकेऽपि-
तदप्राप्तिः॥१८॥इतरेतरप्रत्ययत्वा-
दितिचेन्नोत्पत्तिमात्रनिमित्तत्वा-
त्॥१९॥उत्तरोत्पादेचपूर्वनिरोधा-
त्॥२०॥असतिप्रतिज्ञोपरोधोयौग-
पद्यमन्यथा॥२१॥प्रतिसङ्ख्याप्रति-
सङ्ख्यानिरोधाप्राप्तिरविच्छेदात्॥
२२॥उभयथाचदोषात्॥२३॥आका-
शेचाविशेषात्॥२४॥अनुस्मृतेश्च॥
२५॥नासतोऽदृष्टत्वात्॥२६॥उ-
दासीनानामपिचैवंसिद्धिः॥२७॥
नाभावउपलब्धेः॥२८॥वैधर्म्या-
च्चनस्वप्नादिवत्॥२९॥नभावोऽनु-
पलब्धेः॥३०॥क्षणिकत्वाच्च॥३१॥

सर्वथानुपपत्तेश्च॥३२॥नैकस्मिन्न-
संभवात्॥३३॥एवंचात्माऽकार्त्स्न्य-
म्॥३४॥नचपर्यायादप्यविरोधो-
विकारादिभ्यः॥३५॥अन्त्यावस्थिते-
श्चोभयनित्यत्वादविशेषः॥३६॥
पत्युरसामञ्जस्यात्॥३७॥संबन्धा-
नुपपत्तेश्च॥३८॥अधिष्ठानानुपप-
त्तेश्च॥३९॥करणवच्चेन्नभोगादि-
भ्यः॥४०॥अन्तवत्त्वमसर्वज्ञतावा॥
४१॥उत्पत्त्यसंभवात्॥४२॥नच-
कर्तुःकरणम्॥४३॥विज्ञानादिभा-
वेवातदप्रतिषेधः॥४४॥विप्रति-
षेधाच्च॥४५॥इतिद्वितीयःपादः॥
॥अथद्वितीयाध्यायस्यतृतीयःपादः॥
नवियदश्रुतेः॥१॥अस्तितु॥२॥गौ-
ण्यसंभवात्॥३॥शब्दाच्च॥४॥स्या-

च्चैकस्यब्रह्मशब्दवत्॥५॥प्रतिज्ञा-
हानिरव्यतिरेकाच्छब्देभ्यः॥६॥
यावद्विकारंतुविभागोलोकवत्॥
॥७॥एतेनमातरिश्वाव्याख्यातः॥
॥८॥असंभवस्तुसतोऽनुपपत्तेः॥९॥
तेजोऽतस्तथाह्याह॥१०॥आपः॥११॥
पृथिव्यधिकाररूपशब्दान्तरेभ्यः॥
॥१२॥तदभिध्यानादेवतुतल्लिङ्गा-
त्सः॥१३॥विपर्ययेणतुक्रमोऽतउ-
पपद्यतेच॥१४॥अन्तराविज्ञानम-
नसीक्रमेणतल्लिङ्गादितिचेन्नावि-
शेषात्॥१५॥चराचरव्यपाश्रयस्तु-
स्यात्तद्व्यपदेशोभाक्तस्तद्भावभा-
वित्वात्॥१६॥नात्माऽश्रुतेर्नित्य-
त्वाच्चताभ्यः॥१७॥ज्ञोऽतएव॥
॥१८॥उत्क्रान्तिगत्यागतीनाम्॥

॥१९॥ स्वात्मना चोत्तरयोः ॥२०॥
नाणुरतच्छ्रुतेरिति चेन्नेतराधि-
कारात् ॥२१॥ स्वशब्दोन्मानाभ्यां
च ॥२२॥ अविरोधश्चन्दनवत् ॥२३॥
अवस्थितिवैशेष्यादिति चेन्नाभ्यु-
पगमाद्धृदि हि ॥२४॥ गुणाद्वालो-
कवत् ॥२५॥ व्यतिरेको गन्धवत्
॥२६॥ तथा च दर्शयति ॥२७॥ पृथ-
गुपदेशात् ॥२८॥ तद्गुणसारत्वा-
त्तु तद्व्यपदेशः प्राज्ञवत् ॥२९॥ या-
वदात्मभावित्वाच्च न दोषस्तद्द-
र्शनात् ॥३०॥ पुंस्त्वादिवत्त्वस्य स-
तोऽभिव्यक्तियोगात् ॥३१॥ नि-
त्योपलब्ध्यनुपलब्धिप्रसङ्गोऽ
न्यतरनियमो वान्यथा ॥३२॥ क-
र्ता शास्त्रार्थवत्त्वात् ॥३३॥ विहा-

रोपदेशात्॥३४॥उपादानात्॥३५॥
व्यपदेशाच्चक्रियायांनचेन्निर्देश-
विपर्ययः॥३६॥उपलब्धिवदनि-
यमः॥३७॥शक्तिविपर्ययात्॥३८॥
समाध्यभावाच्च॥३९॥यथाचत-
क्षोभयथा॥४०॥ परात्तुतच्छ्रुतेः॥४१॥
कृतप्रयत्नापेक्षस्तुविहितप्रतिषि-
द्धावैयर्थ्यादिभ्यः॥४२॥अंशोना-
नाव्यपदेशादन्यथाचापिदाशकि-
तवादित्वमधीयतएके॥४३॥म-
न्त्रवर्णाच्च॥४४॥अपिचस्मर्यते
॥४५॥प्रकाशादिवन्नैवंपरः॥४६॥
स्मरन्तिच॥४७॥अनुज्ञापरिहारौ
देहसंबन्धाज्ज्योतिरादिवत्॥४८॥
असन्ततेश्चाव्यतिकरः॥४९॥
आभासएवच॥५०॥अदृष्टानियमा-

त्॥५१॥ अभिसंध्यादिष्वपिचैवम्
॥५२॥ प्रदेशादितिचेन्नान्तर्भावात्
॥५३॥ इतितृतीयःपादःसमाप्तम्॥

॥अथद्वितीयाध्यायस्यचतुर्थःपादः॥

तथाप्राणाः॥१॥ गौण्यसंभवात्॥२॥
तत्प्राक्छ्रुतेश्च॥३॥ तत्पूर्वकत्वाद्वा-
चः॥४॥ सप्तगतेर्विशेषितत्वाच्च॥५॥
हस्तादयस्तुस्थितेऽतोनैवम्॥६॥
अणवश्च॥७॥ श्रेष्ठश्च॥८॥ नवायु-
क्रियेपृथगुपदेशात्॥९॥ चक्षुरा-
दिवत्तुतत्सहशिष्ट्यादिभ्यः॥१०॥
अकरणत्वाच्चनदोषस्तथाहिदर्श-
यति॥११॥ पञ्चवृत्तिर्मनोवद्व्यपदि-
श्यते॥१२॥ अणुश्च॥१३॥ ज्योतिरा-
द्यधिष्ठानंतुतदामननात्॥१४॥
प्राणवताशब्दात्॥१५॥ तस्यच-

नित्यत्वात्॥१६॥तइन्द्रियाणित-
द्व्यपदेशादन्यत्रश्रेष्ठात्॥१७॥भे-
दश्रुतेः॥१८॥वैलक्षण्याच्च॥१९॥सं-
ज्ञामूर्तिक्लृप्तिस्तुत्रिवृत्कुर्वतउप-
देशात्॥२०॥मांसादिभौमंयथा
शब्दमितरयोश्च॥२१॥वैशेष्यात्तु-
तद्वादस्तद्वादः॥२२॥इतिचतुर्थः
पादःसमाप्तः॥४॥२॥इति॥

॥अथतृतीयाध्यायस्यप्रथमःपादः॥

तदन्तरप्रतिपत्तौरंहतिसंपरिष्व-
क्तःप्रश्ननिरूपणाभ्याम्॥१॥त्र्या-
त्मकत्वात्तुभूयस्त्वात्॥२॥प्राणग-
तेश्च॥३॥अग्न्यादिगतिश्रुतेरिति-
चेन्नभाक्तत्वात्॥४॥प्रथमेश्रवणा-
दितिचेन्नताएवह्युपपत्तेः॥५॥अ-
श्रुतत्वादितिचेन्नेष्टादिकारिणां-

प्रतीतेः॥६॥भाक्तंवानात्मवित्त्वा-
त्तथाहिदर्शयति॥७॥कृतात्ययेऽ
नुशयवान्दृष्टस्मृतिभ्यांयथेत-
मनेवंच॥८॥चरणादितिचेन्नोप-
लक्षणार्थेतिकार्ष्णाजिनिः॥९॥
आनर्थक्यमितिचेन्नतदपेक्षत्वात्॥
॥१०॥सुकृतदुष्कृतेएवेतितुबादरिः
॥११॥अनिष्टादिकारिणामपिचश्रु-
तम्॥१२॥संयमनेत्वनुभूयेतरेषा-
मारोहावरोहौतद्गतिदर्शनात्॥१३॥
स्मरन्तिच॥१४॥अपिचसप्त॥१५॥
तत्रापिचतद्व्यापारादविरोधः॥
॥१६॥विद्याकर्मणोरितितुप्रकृत-
त्वात्॥१७॥नतृतीयेतथोपलब्धेः॥
॥१८॥स्मर्यतेऽपिचलोके॥१९॥
दर्शनाच्च॥२०॥तृतीयशब्दाव-

रोधः संशोकजस्य ॥ २१ ॥ तत्साभाव्या-
पत्तिरुपपत्तेः ॥ २२ ॥ नातिचिरेणवि-
शेषात् ॥ २३ ॥ अन्याधिष्ठितेपूर्ववद-
भिलापात् ॥ २४ ॥ अशुद्धमितिचेन्नश-
ब्दात् ॥ २५ ॥ रेतस्सिग्योगोऽथ ॥ २६ ॥
योनेः शरीरम् ॥ २७ ॥ इति प्रथमः पा-
दः समाप्तम् ॥ १ ॥ ३ ॥
अथतृतीयाध्यायस्यद्वितीयः पादः
सन्ध्येसृष्टिराहहि ॥ १ ॥ निर्मातारंचै-
केपुत्रादयश्च ॥ २ ॥ मायामात्रंतुका-
र्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ॥ ३ ॥
सूचकश्चहिश्रुतेराचक्षतेचतद्विदः ॥
४ ॥ पराभिध्यानात्तुतिरोहितंततोह्य-
स्यबन्धविपर्ययौ ॥ ५ ॥ देहयोगा-
द्वासोऽपि ॥ ६ ॥ तदभावोनाडीषुतच्छ्रु-
तेरात्मनिच ॥ ७ ॥ अतः प्रबोधोऽस्मा-

त्॥८॥ सएवतुकर्मानुस्मृतिशब्द-
विधिभ्यः॥९॥ मुग्धेऽर्धसंपत्तिःप-
रिशेषात्॥१०॥ नस्थानतोऽपिपरस्यो-
भयलिङ्गंसर्वत्रहि॥११॥ नभेदादिति-
चेन्नप्रत्येकमतद्वचनात्॥१२॥ अपि-
चैवमेके॥१३॥ अरूपवदेवहितत्प्रधा-
नत्वात्॥१४॥ प्रकाशवच्चावैयर्थ्यम्॥
॥१५॥ आहचतन्मात्रम्॥१६॥ दर्शयति-
चाथोअपिस्मर्यते॥१७॥ अतएवचोप-
मासूर्यकादिवत्॥१८॥ अम्बुवदग्रह-
णात्तुनतथात्वम्॥१९॥ वृद्धिह्रासभा-
क्त्वमन्तर्भावादुभयसामञ्जस्या-
देवम्॥२०॥ दर्शनाच्च॥२१॥ प्रकृतै-
तावत्त्वंहिप्रतिषेधतिततोब्रवीति-
चभूयः॥२२॥ तदव्यक्तमाहहि॥२३॥
अपिसंराधनेप्रत्यक्षानुमानाभ्याम्॥

॥२४॥ प्रकाशादिवच्चावैशेष्यंप्रका-
शश्चकर्मण्यभ्यासात्॥२५॥ अतो-
ऽनन्तेनतथाहिलिङ्गम्॥२६॥ उभ-
यव्यपदेशात्त्वहिकुण्डलवत्॥२७॥
प्रकाशाश्रयवद्वातेजस्त्वात्॥२८॥
पूर्ववद्वा॥२९॥ प्रतिषेधाच्च॥३०॥ प-
रमतःसेतून्मानसंबन्धभेदव्यप-
देशेभ्यः॥३१॥ सामान्यात्तु॥३२॥
बुद्ध्यर्थःपादवत्॥३३॥ स्थानविशे-
षात्प्रकाशादिवत्॥३४॥ उपपत्ते-
श्च॥३५॥ तथान्यप्रतिषेधात्॥३६॥
अनेनसर्वगतत्वमायामशब्दादि-
भ्यः॥३७॥ फलमतउपपत्तेः॥३८॥
श्रुतत्वाच्च॥३९॥ धर्मंजैमिनिरत-
एव॥४०॥ पूर्वंतुबादरायणोहेतुव्य-
पदेशात्॥४१॥ इतिद्वितीयःपादः

समाप्तम्॥२॥३॥

अथतृतीयाध्यायस्यतृतीयःपादः॥३॥

सर्ववेदान्तप्रत्ययंचोदनाद्यविशेषा-
त्॥१॥भेदान्नेतिचेन्नैकस्यामपि॥२॥
स्वाध्यायस्यतथात्वेनहिसमाचा-
रेऽधिकाराच्चसववच्चतन्नियमः॥३॥
दर्शयतिच॥४॥उपसंहारोऽर्थाभेदा-
द्विधिशेषवत्समानेच॥५॥अन्यथा-
त्वंशब्दादितिचेन्नाविशेषात्॥६॥न
वाप्रकरणभेदात्परोवरीयस्त्वादि-
वत्॥७॥संज्ञातश्चेत्तदुक्तमस्तितुत-
दपि॥८॥व्याप्तेश्चसमञ्जसम्॥९॥स-
र्वाभेदादन्यत्रेमे॥१०॥आनन्दादयः
प्रधानस्य॥११॥प्रियशिरस्त्वाद्यप्रा-
प्तिरुपचयापचयौहिभेदे॥१२॥
इतरेत्वर्थसामान्यात्॥१३॥आध्या-

नायप्रयोजनाभावात्॥१४॥आत्म-
शब्दाच्च॥१५॥आत्मगृहीतिरितर-
वदुत्तरात्॥१६॥अन्वयादितिचेत्स्या-
दवधारणात्॥१७॥कार्याख्याना-
दपूर्वम्॥१८॥समानएवंचाभेदात्
॥१९॥संबन्धादेवमन्यत्रापि॥२०॥न-
वाविशेषात्॥२१॥दर्शयतिच॥२२॥
संभृतिद्युव्याप्त्यपिचातः॥२३॥पु-
रुषविद्यायामिवचेतरेषामनाम्ना-
नात्॥२४॥वेधाद्यर्थभेदात्॥२५॥
हानौतूपायनशब्दशेषत्वात्कुशा-
च्छन्दस्स्तुत्युपगानवत्तदुक्तम्॥
॥२६॥सांपरायेतर्त्तव्याभावात्तथा-
ह्यन्ये॥२७॥छन्दतउभयाविरोधा-
त्॥२८॥गतेरर्थवत्त्वमुभयथान्य-
याहिविरोधः॥२९॥उपपन्नस्तल्ल-

क्षणार्थोपलब्धेर्लोकवत् ॥३०॥ अनिय-
मः सर्वेषामविरोधः शब्दानुमानाभ्या-
म् ॥३१॥ यावदधिकारमवस्थितिरा-
धिकारिकाणाम् ॥३२॥ अक्षरधियां
त्ववरोधः सामान्यतद्भावाभ्यामौप-
सदवत्तदुक्तम् ॥३३॥ इयदामननात् ॥
३४॥ अन्तरा भूतग्रामवत्स्वात्मनः ॥
३५॥ अन्यथाभेदानुपपत्तिरितिचे-
न्नोपदेशान्तरवत् ॥३६॥ व्यतिहारो
विशिंषन्ति हीतरवत् ॥३७॥ सैव हि
सत्यादयः ॥३८॥ कामादीतरत्रतत्र-
चायतनादिभ्यः ॥३९॥ आदरादलो-
पः ॥४०॥ उपस्थितेऽतस्तद्वचनात् ॥
४१॥ तन्निर्धारणानियमस्तद्दृष्टेः
पृथग्ध्यप्रतिबन्धः फलम् ॥४२॥
प्रदानवदेव तदुक्तम् ॥४३॥ लिङ्गभूय-

स्त्वात्तद्धिबलीयस्तदपि॥४४॥ पूर्व
विकल्पः प्रकरणात्स्यात्क्रियामा-
नसवत्॥४५॥ अतिदेशाच्च॥४६॥
विद्यैवतुनिर्धारणात्॥४७॥ दर्शना-
च्च॥४८॥ श्रुत्यादिबलीयस्त्वाच्चन-
बाधः॥४९॥ अनुबन्धादिभ्यः प्रज्ञा-
न्तरपृथक्त्ववद्दृष्टश्चतदुक्तम्॥५०॥
नसामान्यादप्युपलब्धेर्मृत्युवन्नहि-
लोकापत्तिः॥५१॥ परेणचशब्दस्य
ताद्विध्यंभूयस्त्वात्त्वनुबन्धः॥५२॥
एकआत्मनः शरीरे भावात्॥५३॥
व्यतिरेकस्तद्भावाभावित्वान्नतूप-
लब्धिवत्॥५४॥ अङ्गावबद्धास्तुन-
शाखासुहिप्रतिवेदम्॥५५॥ मंत्रादि-
वद्वाऽविरोधः॥५६॥ भूम्नः क्रतुवज्ज्या-
यस्त्वंतथाहिदर्शयति॥५७॥ नाना-

शब्दादिभेदात् ५८ विकल्पोऽवि-
शिष्टफलत्वात् ५९ काम्यास्तु य-
थाकामंसमुच्चीयेरन्नवापूर्वहेत्व-
भावात् ६० अङ्गेषुयथाश्रयभावः
६१ शिष्टेश्च ६२ समाहारात् ६३
गुणसाधारण्यश्रुतेश्च ६४ न वा-
तत्सहभावाश्रुतेः ६५ दर्शनाच्च
६६ इतितृतीयाध्यायस्यतृतीयः
पादःसमाप्तम् ३ ३
अथतृतीयाध्यायस्यचतुर्थपादः ४
पुरुषार्थोऽतःशब्दादितिबादराय-
णः १ शेषत्वात्पुरुषार्थवादोयथा-
न्येष्वितिजैमिनिः २ आचारदर्श-
नात् ३ तच्छ्रुतेः ४ समन्वारम्भ-
णात् ५ तद्वतोविधानात् ६ निय-
माच्च ७ अधिकोपदेशात्तुबादरा-

यणस्यैवंतद्दर्शनात्॥८॥तुल्यंतु-
दर्शनम्॥९॥असार्वत्रिकी॥१०॥वि-
भागःशतवत्॥११॥अध्ययनमात्र-
वतः॥१२॥नाविशेषात्॥१३॥स्तुत-
येऽनुमतिर्वा॥१४॥कामकारेणचै-
के॥१५॥उपमर्दंच॥१६॥ऊर्ध्वरेतस्सु-
चशब्देहि॥१७॥परामर्शंजैमिनि-
रचोदनाचापवदतिहि॥१८॥अनुष्ठे-
यंबादरायणःसाम्यश्रुतेः॥१९॥
विधिर्वाधारणवत्॥२०॥स्तुतिमा-
त्रमुपादानादितिचेन्नापूर्वत्वात्
॥२१॥भावशब्दाच्च॥२२॥पारिप्ल-
वार्थाइतिचेन्नविशेषितत्वात्॥२३॥
तथाचैकवाक्यतोपबन्धात्॥२४॥
अतएवचाग्नीन्धनाद्यनपेक्षा॥२५॥
सर्वापेक्षाचयज्ञादिश्रुतेरश्ववत्॥२६॥

शमदमाद्युपेतःस्यात्तथापितुतद्विधे-
स्तदङ्गतयातेषामवश्यानुष्ठेयत्वात्
॥२७॥सर्वान्नानुमतिश्चप्राणात्ययेत-
द्दर्शनात्॥२८॥अबाधाच्च॥२९॥अपि
चस्मर्यते॥३०॥शब्दश्चातोऽकामका-
रे॥३१॥विहितत्वाच्चाश्रमकर्मापि
॥३२॥सहकारित्वेनच॥३३॥सर्वथा-
पितएवोभयलिङ्गात्॥३४॥अनभि-
भवंचदर्शयति॥३५॥अन्तराचापि-
तुतद्दृष्टेः॥३६॥अपिचस्मर्यते॥३७॥
विशेषानुग्रहश्च॥३८॥अतस्त्वितर-
ज्ज्यायोलिङ्गाच्च॥३९॥तद्भूतस्यतुना-
तद्भावोजैमिनेरपिनियमातद्रूपाभा-
वेभ्यः॥४०॥नचाधिकारिकमपिप-
तनानुमानात्तदयोगात्॥४१॥उपपू-
र्वमपित्वेकेभावमशनवत्तदुक्तम्॥

॥४२॥ बहिस्तूभयथापिस्मृतेराचा-
राच्च॥४३॥स्वामिनःफलश्रुतेरित्या-
त्रेयः॥४४॥आर्त्विज्यमित्यौडुलोमि-
स्तस्मैहिपरिक्रीयते॥४५॥श्रुतेश्च
॥४६॥सहकार्यन्तरविधिःपक्षेणतृ-
तीयंतद्वतोविध्यादिवत्॥४७॥कृ-
त्स्नभावात्तुगृहिणोपसंहारः॥४८॥
मौनवदितरेषामप्युपदेशात्॥४९॥
अनाविष्कुर्वन्नन्वयात्॥५०॥ऐहिक-
मप्यप्रस्तुतप्रतिबन्धेतद्दर्शनात्
॥५१॥एवंमुक्तिफलानियमस्तदव-
स्थावधृतेस्तदवस्थावधृतेः॥५२॥
इतितृतीयाध्यायस्यचतुर्थःपादः
समाप्तम्॥३॥४॥इति॥
अथचतुर्थाध्यायस्यप्रथमःपादः१॥
आवृत्तिरसकृदुपदेशात्॥१॥लिङ्गाच्च

॥२॥ आत्मेतितूपगच्छन्तिग्राहयन्ति-
च॥३॥ नप्रतीकेनहिसः॥४॥ ब्रह्मदृष्टि-
रुत्कर्षात्॥५॥ आदित्यादिमतयश्चा-
ङ्गउपपत्तेः॥६॥ आसीनःसंभवात्॥७॥
ध्यानाच्च॥८॥ अचलत्वंचापेक्ष्य॥९॥
स्मरन्तिच॥१०॥ यत्रैकाग्रतातत्रा-
विशेषात्॥११॥ आप्रायणात्तत्रापि-
हिदृष्टम्॥१२॥ तदधिगमउत्तरपूर्वा-
घयोरश्लेषविनाशौतद्व्यपदेशात्॥
॥१३॥ इतरस्याप्येवमसंश्लेषःपा-
तेतु॥१४॥ अनारब्धकार्येएवतुपूर्वे-
तदवधेः॥१५॥ अग्निहोत्रादितुतत्का-
र्यायैवतद्दर्शनात्॥१६॥ अतोऽन्या-
पिह्येकेषामुभयोः॥१७॥ यदेवвि-
द्ययेतिहि॥१८॥ भोगेनत्वितरेक्ष-
पयित्वासंपद्यते॥१९॥ इतिप्रथमः

पादःसमाप्तम्॥१॥

अथचतुर्थाध्यायस्यद्वितीयःपादः॥

वाङ्मनसिदर्शनाच्छब्दाच्च॥१॥
अतएवचसर्वाण्यनु॥२॥तन्मनःप्रा-
णउत्तरात्॥३॥सोऽध्यक्षेतदुपगमा-
दिभ्यः॥४॥भूतेषुतच्छ्रुतेः॥५॥
नैकस्मिन्दर्शयतोहि॥६॥समाना-
चासृत्युपक्रमादमृतत्वंचानुपोष्य॥
७॥तदापीतेःसंसारव्यपदेशात्॥
८॥सूक्ष्मंप्रमाणतश्चतथोपलब्धेः॥
९॥नोपमर्देनातः॥१०॥अस्यैवचो-
पपत्तेरेषऊष्मा॥११॥प्रतिषेधादि-
तिचेन्नशारीरात्॥१२॥स्पष्टोह्ये-
केषाम्॥१३॥स्मर्यतेच॥१४॥ता-
निपरेतथाह्याह॥१५॥अविभागो-
वचनात्॥१६॥तदोकोऽग्रज्वलनं-

तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छे-
षगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः
शताधिकया ॥१७॥ रश्म्यनुसारी ॥१८॥
[redacted] निशि नेति चेन्न संबन्धस्य याव-
द्देहभावित्वाद्दर्शयति च ॥१९॥ अतश्चा-
यनेऽपि हि दक्षिणे ॥२०॥ योगिनः प्रति-
च स्मर्यते स्मार्ते चैते ॥२१॥ इति द्विती-
यः पादः समाप्तम् ॥ २ ॥

अथ चतुर्थाध्यायस्य तृतीयः पादः ॥३॥

अर्चिरादिना तत्प्रथितेः ॥१॥ वायुमब्दा-
दविशेषविशेषाभ्याम् ॥२॥ तडितो-
ऽधिवरुणः संबन्धात् ॥३॥ आतिवाहि-
कास्तल्लिङ्गात् ॥४॥ उभयव्यामोहा-
त्तत्सिद्धेः ॥५॥ वैद्युतेनैव ततस्तच्छ्रुतेः
॥६॥ कार्यं बादरिरस्य गत्युपपत्तेः ॥
॥७॥ विशेषितत्वाच्च ॥८॥ समीप्या-

त्तुतव्यपदेशः॥९॥कार्यात्ययेतद-
ध्यक्षेणसहातः परमभिधानात्॥१०॥
स्मृतेश्च॥११॥परंजैमिनिर्मुख्यत्वा-
त्॥१२॥दर्शनाच्च॥१३॥नचकार्येप्रति-
पत्त्यभिसंधिः॥१४॥अप्रतीकाल-
म्बनान्नयतीतिबादरायणउभयथा-
दोषात्तत्क्रतुश्च॥१५॥विशेषंचदर्श-
यति॥१६॥इतितृतीयःपादःसमाप्तम्॥
अथचतुर्थाध्यायस्यचतुर्थःपादः॥४॥
संपद्याविर्भावःस्वेनशब्दात्॥१॥
मुक्तःप्रतिज्ञानात्॥२॥आत्माप्रक-
णात्॥३॥अविभागेनदृष्टत्वात्॥४॥
ब्राह्मेणजैमिनिरुपन्यासादिभ्यः॥५॥
चितितन्मात्रेणतदात्मकत्वादित्यौ-
डुलोमिः॥६॥एवमप्युपन्यासात्
पूर्वभावादविरोधंबादरायणः॥७॥

संल्पादेवतुतच्छ्रुतेः॥८॥अतएवचा-
नन्याधिपतिः॥९॥अभावंबादरिराह-
ह्येवम्॥१०॥भावंजैमिनिर्विकल्पाम-
ननात्॥११॥द्वादशाहवदुभयविधंबा-
दरायणोऽतः॥१२॥तन्वभावेसंध्य-
वदुपपत्तेः॥१३॥भावेजाग्रद्वत्॥१४॥
प्रदीपवदावेशस्तथाहिदर्शयति॥
१५॥स्वाप्ययसंपत्त्योरन्यतरापे-
क्षमाविष्कृतंहि॥१६॥जगद्व्यापार-
वर्जंप्रकरणादसंनिहितत्वाच्च॥१७॥
प्रत्यक्षोपदेशान्नेतिचेन्नाधिकारि-
कमण्डलस्थोक्तेः॥१८॥विकाराव-
र्तिचतथाहिस्थितिमाह॥१९॥दर्श-
यतश्चैवंप्रत्यक्षानुमाने॥२०॥[redacted]
भोगमात्रसाम्यलिङ्गाच्च॥२१॥अना-
वृत्तिःशब्दादनावृत्तिःशब्दात्॥२२॥

इतिचतुर्थाध्यायस्यचतुर्थः पादः॥

॥समाप्तम्॥

॥समाप्तोऽयं ग्रन्थः॥इति॥

श्रीमन्निखिलाऽद्वैतसिद्धान्तपदाधि-
रूढानां निजप्रतापमहिम्ना प्रसह्य
प्रज्ञानिहृदयेषुज्ञानदीपंप्रज्वालय-
तां प्रनुद्धताकारतयान्तःकरणवृ-
त्याजगतिप्रकाशं तन्वतां तृणीकृत-
वैभवखण्डलानांदर्शनादेवप्रत्यह-
[redacted]पुञ्जं दहतां श्रीमदपरोशंकरा-
चार्यइवावतीर्णानां श्रीश्रीश्रीश्रीश्री-
श्रीस्वामिवर्य्येश्वरानन्दपरिब्राज-
कानां श्रीसद्गुरूणामाज्ञानुसरता-
उन्नावमण्डलान्तर्गतसरावरग्रा-
मन्निवासिनाक्षत्रियवंशोद्भवेन[redacted]
बख्श
मंहेश[redacted]सिंहात्मजशीतलप्रसादसिं-

हृन्नस्यात्मजहरदेवसिंह (उपनाम)
लल्लावर्मणाप्ययमब्रह्मसूत्र ग्रन्थः
समुल्लेख्यतेषामेवचरणसरोरुहेषु-
॥ समर्पित्तम् ॥
॥ इत्तिशुभ ॥
(ॐ)

॥श्री॥

॥श्रीगणेशायनमः॥

॥अथाष्टमः सर्गः॥८॥

अथ प्रतस्थे भगवान्प्रयागात्तन्मण्डनं
पण्डितमाशुजेतुम् ॥ गच्छन्खसृत्या –
पुरमालुलोके माहिष्मतीं मण्डनमण्डि-
तां सः ॥१॥ प्रवातरथ्यत्न विचित्रवप्रां –
विलोकयतां विस्मितमानसोऽसौ ॥
पुराणवत्पुष्करवर्तनीतः पुरोपकण्ठ –
स्थवने मनोज्ञे ॥२॥ प्रफुल्लराजीववने
विहारी तरङ्गरिङ्गत्कणशीकरार्द्रः ॥ रेवा-
मरुत्कम्पितसालमालः श्रमापहृद्धाप्य-
कृतं सिषेवे ॥३॥ तस्मिन्स विश्रम्य कृता-
ह्निकः सन्खस्वस्तिकारोहणशालिनी-
ने ॥ गच्छन्नसौ मण्डनपण्डितोकोदासी-
स्तदीयाः सददर्श मार्गे ॥४॥ कुत्राऽऽस -

त्वयो मण्डनपण्डितस्येत्येताः सपप्रच्छ-
जलायगान्त्रीः ॥ ताश्चापि दृष्ट्वाऽद्भुत-
शंकरं तं संतोषवत्योददुरुत्तरं स्म
॥५॥ स्वतः प्रमाणं परतः प्रमाणं कीरा-
ङ्गना यत्र गिरं गिरन्ति ॥ द्वारस्थनीडा-
न्तरसंनिरुद्धाजानीहि तन्मण्डनपण्डि-
तौकः ॥६॥ फलप्रदं कर्म फलप्रदोऽ-
जः कीराङ्गना यत्र गिरं गिरन्ति ॥ द्वार-
स्थनीडान्तरसंनिरुद्धाजानीहि तन्म-
ण्डनपण्डितौकः ॥७॥ जगद् ध्रुवं स्या
ज्जगदध्रुवं स्यात्कीराङ्गना यत्र गिरं
गिरन्ति ॥ द्वारस्थनीडान्तरसंनिरुद्धा-
जानीहि तन्मण्डनपण्डितौकः ॥ ८ ॥
पीत्वा तदुक्तोरथतस्य गेहाद्गत्वा बहिः
सद्मकवाटगुप्तम् ॥ दुर्वेद्यमालोच्य-
संयोगशक्त्या व्योमाध्वनाऽवात-

रदंगणान्तः ॥ ९ ॥ तदा सलेखेन्द्रनि-
केतनामं स्फुरन्मरुच्चञ्चलकेतनामम् ॥
समग्रमालोकत मण्डनस्य निवेशनं —
भूतलमण्डनस्य ॥ १० ॥ सौधाग्रसंघ-
न्ननमोवकाशं प्रविश्यतत्प्राप्यकवेः
सकाशम् ॥ विद्याविशेषात्तयशः प्रका-
शं ददर्शतं पद्मजसंनिकाशम् ॥ ११ ॥
तपोमहिम्नैव तपोनिधानं सजैमिनिं
सत्यवतीतनूजम् ॥ यथाविधि श्राद्ध
विधौ निमन्त्र्य तत्पादपद्मान्यवनेज-
यन्तम् ॥ १२ ॥ तत्रान्तरिक्षादवतीर्य-
योगिवर्यः समागम्य यथार्हमेषः ॥ द्वै-
पायनं जैमिनिमप्युमाभ्यां ताभ्यां स-
हर्षं प्रतिनंदितोऽभूत् ॥ १३ ॥ अथद्यु-
मार्गादवतीर्णमन्तिके मुन्योः स्थितं
ज्ञानशिखोपवीतिनम् ॥ संन्यास्य —

सावित्यवगात्यसोऽभवत्प्रवृत्तिशा-
स्त्रे करतोऽपिकोपनः ॥१४॥ तदाँति-
रुष्टस्यगृहाश्रमेशितुर्यतीश्वरस्या-
पिकुतूहलंभृतः ॥ क्रमात्किलैवंबुध-
शस्तयोस्तयोःप्रश्नोत्तराण्यासुरयो-
त्तरोत्तरम् ॥१५॥ कुतो [redacted] मुण्डया-
गलान्मुण्डी पन्थास्ते पृच्छ्यते म-
या ॥ किमाह पन्थास्त्वन्माता मुण्डे-
त्याह तथैवहि ॥१६॥ पन्थानंत्वमपृ-
च्छस्त्वां पन्थाःप्रत्याह मण्डन ॥ त्व-
न्मातेत्यत्रशब्दोऽयंनमांब्रूयादपृ-
च्छकम् ॥१७॥ अहो पीता किमुसुरा-
नैवश्वेता यतः स्मर ॥ किं त्वंजाना-
सि तद्वर्णमहंवर्णं भवान्रसम् ॥१८॥
मत्तोजातःकलञ्जाशी विपरीतानिभा-
षते ॥ सत्यंब्रवीति पितृवत्त्वत्तोजातः

कलत्रभुक् ॥१९॥ कन्थां वहसि दुर्बुद्धे गर्दभेनापि दुर्वहाम् ॥ शिखायज्ञोपवीताभ्यां कस्ते भारो भविष्यति ॥२०॥ कन्थां वहामि दुर्बुद्धे तव पित्राऽपि दुर्भराम् ॥ शिखायज्ञोपवीताभ्यां श्रुते र्भारो भविष्यति ॥२१॥ त्यक्त्वा पाणिगृहीतीं स्वामशक्त्या परिरक्षणे ॥ शिष्यपुस्तकभारेच्छोर्व्याख्याता ब्रह्मनिष्ठता ॥ ॥२२॥ गुरुशुश्रूषणालस्यात्समावर्त्य गुरोः कुलात् ॥ स्त्रियः शुश्रूषमाणस्य व्याख्याता कर्मनिष्ठता ॥२३॥ स्थितोऽसि योषितां गर्भे ताभिरेव विवर्धितः ॥ अहो कृतघ्नता मूर्ख कथं ता एव निन्दसि ॥२४॥ यासां स्तन्यं त्वया पीतं यासां जातोऽसि योनितः ॥ तासु मूर्खतम स्त्रीषु पशुवद्रमसे कथम् ॥२५॥ वीर-

हत्यामवाप्नोऽसिवह्नीनुङ्गास्ययत्नतः॥
आत्महत्यामवाप्तस्त्वमविदित्वापरं
पदम्॥२६॥ दौवारिकान्वञ्चयित्वा-
कथंस्तेनवदागतः॥ भिक्षुभ्योऽन्नम-
दत्वात्वंस्तेनवल्लोक्यसेकथम्॥२७॥
कर्मकालेनसंभाष्यमहंमूर्खेणसंप्रति॥
अहोप्रकटितंज्ञानंयतिभङ्गेनभाषिणा-
॥२८॥ यतिभङ्गेप्रवृत्तस्ययतिभङ्गेन-
दोषभाक्॥यतिभङ्गेप्रवृत्तस्यपञ्चम्य-
न्तंसमस्यताम्॥२९॥ क्वब्रह्मक्वचदु-
र्मेधाःक्वसंन्यासःक्ववाकलिः॥स्वा-
द्वन्नभक्षकामेणवेषोऽयंयोगिनां-
धृतः॥३०॥क्वस्वर्गःक्वदुराचारःक्वा-
ग्निहोत्रक्ववाकलिः॥मन्येमैथुनका-
मेनवेषोऽयंकर्मिणांधृतः॥३१॥
इत्यादिदुर्वाक्यगणंब्रुवाणेरोषेण-

स्यहंकृतिविश्वरूपे ॥ श्रीशंकरे वक्त-
रितस्य तस्योत्तरं च कौतूहलतश्चचा-
रु ॥ ३२ ॥ तं मण्डनं सस्मितजैमिनी-
क्षितं व्यासोऽब्रवीज्जल्पसि वत्स दु-
र्वचः ॥ प्राचारणानेयमनिन्दितात्म-
नां ज्ञातात्मतत्त्वं यमिनं धुतैषणम् ॥
॥ ३३ ॥ अभ्यागतोऽसौ स्वयमेव विष्णु-
रित्येव मत्वाऽऽशु निमन्त्रयत्वम् ॥
इत्थं श्रवं ज्ञातविधिं प्रतीतं सुध्यग्रणीः
साध्व शिषन्मुनिस्तम् ॥ ३४ ॥ अयो-
पसंस्पृश्य जलं स शान्तः ससंभ्रमं म-
ण्डन पण्डितोऽपि ॥ व्यासाज्ञया शास्त्र
विदर्चयित्वान्यमन्त्रयद्वैद्यकृतेन-
हर्षिम् ॥ ३५ ॥ स चाब्रवीत्सौम्य विवा-
द भिक्षामिच्छन्भवत्संनिधिमाग-
तोऽस्मि ॥ साऽन्योन्यशिष्यत्वपणा-

प्रदेयानास्त्यादरः प्राकृतभक्तभैक्ष्ये
॥३६॥ मम न किंचिदपि ध्रुवमीप्सि-
तं श्रुतिशिरःपथविस्तृतिमन्तरा ॥
प्रवहितेन मखेष्ववधीरितः स भवता-
भवतापहिमद्युतिः ॥३७॥ जगति
संप्रति तं प्रथयाम्यहं समभिभूय स-
मस्तवि[illegible]वादिनम् ॥ त्वमपि संप्र-
यमे मतमुत्तमं विशदवाग्वदवाऽस्मि-
जितस्त्विति ॥३८॥ इति यतिप्रवर-
स्य निशम्य तद्वचनमर्थवदागतवि-
स्मयः ॥ परिभवेन नवेन महायशाः
स निजगौ निजगौरवमास्थितः ॥३९॥
अपि सहस्रमुखे फणिनामके न विजि-
तस्त्विति जातु फणत्ययम् ॥ न च वि-
ज्ञाय मतं श्रुतिसंमतं मुनिमते निपते-
त्परिकल्पिते ॥४०॥ अपि कदाचि-

दुद्देष्यतिकोविदः स्वरसवादकथा-
ऽपिभविष्यति ॥ इतिकुतूहलिनो-
ममसर्ववेदान्वयमहोऽयमहोस्वय-
मागतः ॥४१॥ भवतुसंप्रतिवादकथा-
ऽऽवयोः फलतुपुष्कलशास्त्रपरि-
श्रमः ॥ उपनतास्वयमेवनगृह्यतेन-
वसुधावसुधावसथेनकिम् ॥४२॥
ऽयमहं यमहन्तुरपिस्वयंशमयि-
तामयितावकसद्गिराम् ॥ सुकलहं
कलहंसकलाभृतां दिशसुधांशुसु-
धामलसज्जनो ॥४३॥ ऽपितुदुर्ह-
दयस्मयकाननक्षतिकठोरकुठार-
धुरंधरा ॥ नपटुता ममते श्रवणान्ति-
कं ननुगताऽनुगताखिलदर्शना ॥
॥४४॥ ऽत्यल्पमेतद्भवतेरितंमुने
भैक्ष्यंप्रकुर्वेयदिवाददित्सुना ॥

गतोद्यमोऽहं श्रुतवादवार्तयाचिरे-
प्सितेयवदितानकश्चन ॥४५॥ वा-
दंकरिष्यामिनसंदिहेऽत्रजयाजयौ
नौवदितानकश्चित् ॥ नकण्ठशोषे
कफलोविवादोमियोजिगीषूकुरु-
तस्तुवादम् ॥४६॥ वादेहिवादिप्र-
तिवादिनौद्वौविपक्षपक्षग्रहणंवि-
धत्तः ॥ कान्तौप्रतिज्ञावदतोश्चतस्यां
किंमानमिष्टंवदकःस्वभावः ॥४७॥
कःपार्ष्णिकोऽहंगृहमेधिसत्तम-
स्त्वंभिक्षुराजोवदतामनुत्तमः ॥
जयाजयौनौसपणौविधीयतांततः
परंसाधुवदावसुस्मितौ ॥४८॥
प्रयातिधन्योऽस्मियदार्यपादो
मयासहाभ्यर्थयतेविवादम् ॥ भवि-
ष्यतेवादकथाऽपरेद्युर्मोध्याह्निकं-

संप्रतिकर्मकुर्याम् ॥४९॥ तथेतिसू-
क्तेस्मितशंकरेणभविष्यतेवादक-
थास्वसव ॥ तत्साक्षिभावंव्रजतंमुनी-
न्द्रावित्यर्थयद्वाद रिजैमिनी सः ॥
॥५०॥ विधायभार्यांविदुषींसदस्यां-
विधीयतांवादकथासुधीन्द्र ॥ इत्थं
सरस्वत्यवतारतान्तौ तद्धर्मपत्न्या-
स्तमभाषिषाताम् ॥५१॥ प्रथानु-
मोद्याभिहितंमुनिभ्यांसमण्डना-
र्यः प्रकृतं चिकीर्षुः ॥ प्रानर्चदैवोप-
गतान्मुनीन्द्रानग्नीनिवत्रीन्मुनि-
शेखरांस्तान् ॥५२॥ भुक्त्वोपवि-
ष्टस्यमुनित्रयस्यश्रमापनोदाय
तदीयशिष्यौ ॥ प्रतिष्ठतां पार्श्वग-
तौवरद्रौ सचामरौवीजनमाचर-
न्तौ ॥५३॥ प्रयक्रियान्तेकिलस-

प्रविष्टास्त्रय्यन्तवेद्यार्थविदस्त्र-
योऽमी॥ स्वमन्त्रयंश्चारुपरस्परं ते
मुहूर्तमात्रं किमपि प्रहृष्टाः॥५४॥
तेषां च जेन्द्रालयनिर्गतानामदर्श-
नं जगमतुरङ्गसाङ्गो॥ रेवातटे रम्य-
कदम्बसाले देवालयेऽवस्थितवां-
स्तृतीयः॥५५॥ इति स यतिवरेण्यो-
दैवयोगाद्गुरूणामितरजनदुरापं
दर्शनं प्राप्य हृष्टः॥ तदुदितवचना-
नि श्रावयन्नात्मशिष्याननयदमृ-
ततुल्यान्यात्मवित्तां त्रियामाम्॥
॥५६॥ प्रातः शोणसरोजबान्धवस-
च्चिप्रघोतिते व्योमनि, प्रख्यातः
स विधाय कर्म नियतं प्रज्ञावतामग्र-
णीः॥ साकं शिष्यवरैः प्रपद्य सदनं
सन्मण्डितं माण्डनं, वादायोपवि-

नेशपण्डितसभामध्येमुनिर्ध्येय-
वित् ॥५७॥ ततःसमादिश्यसदस्य-
तायांसधर्म्मिणींमण्डनपण्डितोऽ-
पि ॥ सशारदांनामसमस्तविद्या-
विशारदांवादसमुत्सुकोऽभूत् ॥
॥५८॥ पत्यानियुक्तापतिदेवतासा
सदस्यभावेसुदतीचकाशे ॥ तयो-
र्विवेक्तुंश्रुततारतम्यंसमागतासं
सदिभारतीव ॥५९॥ प्रवृद्धवादो-
त्सुकतांतदीयांविज्ञायविज्ञःप्रथ-
मंयतीन्द्रः ॥ परावरज्ञःसपरावरै-
क्यपरांप्रतिज्ञामकरोत्स्वकीया-
म् ॥६०॥ ब्रह्मैकंपरमार्थसच्चिदम-
लंविश्वप्रपञ्चात्मना शुक्तीरूप्य-
परात्मनेवबहुलाज्ञानावृतंभासते ॥
तज्ज्ञानान्निखिलप्रपञ्चनिलया-

स्वात्मव्यवस्थापरंनिर्वाणंजनि-
मुक्तमभ्युपगतंमानंश्रुतेर्मस्तकम् ॥
॥६१॥ बाढंजयेयदिपराजयभागा-
हंस्यांसंन्यासमङ्गंपरिहृत्यकषा-
यचेलम् ॥ शुक्लंवसीयवसनंद्वय-
भारतीयंवादेजयाजयफलप्रतिदी-
पिकाऽस्तु ॥६२॥ इत्थंप्रतिज्ञांकृ-
तवत्युदारांश्रीशंकरेभिक्षुवरेस्व-
कीयाम् ॥ सविश्वरूपोगृहमेधिव-
र्यश्चक्रेप्रतिज्ञांस्वमतप्रतिष्ठाम्
॥६३॥ वेदान्तानप्रमाणंचितिव-
पुषिपदेतत्रसंगत्ययोगा, त्पूर्वो
भागःप्रमाणंपदचयगमितंकार्य-
वस्तुन्यशेषे ॥ शब्दानांकार्यमात्रं
प्रतिसमधिगताशक्तिरभ्युन्नता-
नां, कर्मभ्योमुक्तिरिष्टातदिहत-

नुभृत्ता माऽऽयुषः स्यात्समाप्तेः ॥६४॥
वादे कृतेऽस्मिन्यदि मे जयान्यस्त्व-
यो दित्तात्स्याद्विपरीतभावः ॥ ध्येयं-
त्वयाऽभूद्रुदिताप्रसाक्ष्येजानाति
चेत्साभविताव धूर्मे ॥६५॥ जेतुः प-
राजितइहाऽऽश्रमनादद्दीतेत्ये तौ सि-
धः कृतपणौ यति विश्वरूपौ ॥ प्रस्वा
मुदारधिषणामभिषिच्य साक्ष्येज-
ल्पं वितेनतुरथो जयदत्तदृष्टी ॥६६॥
प्रावश्यकं परिसमाप्य दिने दिने तौ
वादं समंव्यतनुतां किल सर्ववेदो ॥
एवं विजेतुमनसोरुपविष्टयोस्तां मा-
लां गलेन्यधित सोभयभारतीयम् ॥
॥६७॥ मालायदा मलिनभावमुपैति-
कण्ठे यस्यापि तस्य विजयेतरनिश्च-
यः स्यात् ॥ उक्त्वा गृहं गतवती गृह-

कर्मसक्ताभिक्षाशनेपिचरितुंगृहि-
मस्करिभ्याम्॥६८॥अन्योन्यसंज-
यफलेविहितादरौतौवादंविवादप-
रिनिर्णयमात्तनिष्ठाम्॥ब्रह्मादयः
सुरवराअपिवाहनस्थाःश्रोतुंतदीय-
सदनंस्थितवन्तऊर्ध्वम्॥६९॥
ततस्तयोरासमहान्विवादःसदस्य
विश्राणितसाधुवादः॥स्वपक्षसा-
क्षीकृतसर्ववेदःपरस्परस्यापिकृत
प्रमोदः॥७०॥दिनेदिनेचाधिगत-
प्रकर्षोभूरीभवत्पण्डितसंनिकर्षः॥
अन्योन्यभङ्गाहिततीव्रतर्षस्तयाऽ-
पिदूरीकृतजन्यमर्षः॥७१॥दिने-
दिनेवासरमध्यमेसाव्रतेपतिंभोज-
नकालमेव॥समेत्यभिक्षुंसमयंच
मैस्येदिनान्यभूवन्निति पञ्चषा-

पि ॥७२॥ अन्योन्यमुत्तरमखण्डय-
तां प्रगल्भं बह्वासनौ स्मितविकासि-
मुखारविन्दौ ॥ नस्वेदकम्पगगनेक्ष-
णशालिनौ वा नक्रोधवाक्छलम-
वादिनिरुत्तराभ्याम् ॥७३॥ ततोय-
तिक्ष्माभृदवेक्ष्य दाक्ष्यं क्षोदक्षमं त-
स्य विचक्षणस्य ॥ चिक्षेप तं क्षोभित-
सर्वपक्षं विद्वत्समक्षा प्रतिभातकक्ष्य-
म् ॥७४॥ ततः स्वसिद्धान्तसमर्थ-
नाय प्रागल्भ्यहीनोऽपि सभ्यमु-
ख्यः ॥ जगाद वेदान्तवचः प्रसिद्ध-
मद्वैतसिद्धान्तमपाकरिष्णुः ॥७५॥
भो भो यतिक्ष्माधिपते भवद्भिर्जी-
वेशयोर्वास्तवमैकरूप्यम् ॥ विस्रु-
द्धमङ्गी क्रियते हि तत्र प्रमाणमेवं न
वयं प्रतीमः ॥७६॥ स प्रत्यवादीद्-

दमेवमानं यच्छ्वेतकेतुप्रमुखान्वि-
नेयान् ॥ उद्दालकाद्या गुरवो महान्तः
संग्राहयन्त्यात्मतया परेशम् ॥ ७७ ॥
वेदावसानेषु हि तत्त्वमादिवचांसि
जप्तान्यघमर्षणानि ॥ हुंफण्मुखानी
ववचांसि योगिन्नेषां विवक्षाऽस्ति
कुहस्विदर्थे ॥ ७८ ॥ स्वर्थाप्रतीतौ कि-
लहुंफडादेर्जपोपयोगित्वमभाणि
विज्ञैः ॥ स्वर्थप्रतीतौ स्फुटमन्त्रसत्यां
कथं भवेत्प्राज्ञजपार्यतैव ॥ ७९ ॥
आपाततस्तत्त्वमसीतिवाक्याद्य-
तीशजीवेश्वरयोरभेदः ॥ प्रतीयते
ऽथापि मखादिकर्तृप्रशंसयास्या-
द्विधिशेषएव ॥ ८० ॥ क्रत्वङ्गयूपादि-
कमर्थमादिदेवात्मना वाक्यगणः
प्रशंसन् ॥ शेषः क्रियाकाण्डगतो–

यदिस्यात्काण्डान्तरस्थोऽपिभवे–
त्कथंसः॥८१॥तर्ह्यस्तुजीवेपर–
मात्मदृष्टिविधायकःकर्मसमृद्ध्–
येऽर्हन्॥प्रब्रह्मणिब्रह्मधियंविध–
॥८२॥
त्तेयथामनोब्राह्मनभस्वदादौ॥सं
श्रूयतेऽन्यत्रयथालिङादिर्विधा–
यकोब्रह्मविभावनाय॥तथावि–
धेरश्रवणान्मनीषिन्संजाघटीत्य–
त्रकथंविधानम्॥८३॥यद्वत्प्रति–
ष्ठाफलदर्शनेनविधिर्यतीनांवर–
रात्रिसत्रे॥प्रकल्प्यतेतद्वदिहापि–
मुक्तिफलश्रुतेःकल्पयितुंसयुक्तः
॥८४॥तर्हिक्रियाजन्यतयाविमु–
क्तिःस्वर्गादिवद्धन्तविनश्वरास्या–
त्॥उपासनाकर्तुमकर्तुमन्यथा–
वाकर्तुमर्हामनसःक्रियैव॥८५॥

माभूदिदंतत्त्वमसीतिवाक्यमुपास-
नापर्यवसायिकाममम्॥ किंत्वस्यजी-
वस्यपरेणसाम्यप्रत्यायकंसत्तमवो-
भवीत्तु॥८६॥ किंचेतनत्वेनविवक्षि-
साम्यंसार्वज्ञसार्वात्म्यमुखैर्गुणैर्वा
॥आद्येप्रसिद्धंनखलूपदेश्यमन्ते-
स्वसिद्धान्तविरुद्धतास्यात्॥८७॥
नित्यत्वमात्रेणमुनेपरात्मगुणो-
पमानैःसुखबोधपूर्वैः॥ गुणैरविद्या-
वृत्तितोऽप्रतीतेःसाम्यंब्रवीत्वस्य-
ततोनदोषः॥८८॥ यद्येवमेतस्य
परत्वमेवप्रत्याययत्वत्रदुराग्रहः
कः॥त्वयैवतस्यप्रतिभासशङ्का
विद्धन्नविद्यावरणान्निरस्ता॥८९॥
भोश्चेतनत्वेनशरीरिसाम्यमावे-
द्यतामस्यजगत्प्रसूतेः॥चिदुत्य

तत्वेन परोदितस्याप्यणुप्रधानप्रभृ-
तेर्निरासः ॥ ८० ॥ इन्तैवमस्तीतित-
दाप्रयोगः स्यात्त्वन्मतेतत्त्वंमसीति
नस्यात् ॥ तदैक्षतेत्यत्रजडत्वशङ्का
व्यावर्तनाद्यात्रपुनर्नचोद्यम् ॥ ८१ ॥
नन्वेवमप्यैक्यपरत्वमस्यप्रत्यक्ष-
पूर्वप्रमितिप्रकोपात् ॥ नयुज्यतेत-
ज्जपमात्रयोगिस्वाध्यायविध्या
श्रितमभ्युपेयम् ॥ ८२ ॥ प्रक्षेपचेद्भे-
दप्रमितिस्तदास्यादभेदवादिश्रुति
वाक्यबाधः ॥ प्रसंनिकर्षान्नभवेद्धि
भेदप्रमैवतेनास्यकुतो विरोधः ॥
॥ ८३ ॥ भिन्नोऽहमीशादितिभास-
ते ह्रिभेदस्यजीवात्मविशेषणत्वम् ॥
तत्संनिकर्षोऽ[illegible]स्त्वथसंप्रयो-
गाभावेऽपिभेदेन्द्रिययोर्मनीषिन् ॥

॥८४॥ प्रतिप्रसक्तेर्नतु केवलस्य
विशेषणत्वस्य तदभ्युपेयम्॥ भेदा-
श्रये हीन्द्रियसंनिकृष्टे न संनिकृष्ट-
त्वमिहाऽऽत्मनोऽस्ति ॥८५॥ भेदा-
श्रयात्मेन्द्रियसंनिकर्षो नेत्युक्तमे-
तच्चतुरं न यस्मात्॥ चित्तात्मनोर्द्वि-
त्वयतयाद्धयोरप्यस्त्येव संयोगसमा-
श्रयत्वम् ॥८६॥ आत्माविभुः स्या-
दथवाऽणुमात्रः संयोगिता नोभय-
थाऽपियुक्ता॥ दृष्टा हि सा सावय-
वस्य लोके संयोगिता सावयवेनयो-
गात् ॥८७॥ मनोऽक्षमित्यभ्युप-
गम्य भेदासङ्गित्वमुक्तं परमार्थत-
स्तु॥ साहाय्यकृल्लोचनपूर्वकस्य दी-
पादिवन्नेन्द्रियमेव चित्तम्॥८८॥
भेदप्रमा नेन्द्रियजाऽस्तु तर्हि सा-

क्षिस्वरूपैवतयाऽपियोगिन्॥त-
याविरोधात्परमात्मजीवाभेदंक-
थंबोधयितुंप्रमाणम्॥९९॥प्रत्य-
क्षमात्मेश्वरयोरविद्यामायायुजो-
र्द्योतयतिप्रभेदम्॥श्रुतिस्तयोः
केवलयोरभेदंभिन्नाश्रयत्वान्न-
नयोर्विरोधः॥१००॥स्याद्वाविरो-
धस्तदपिप्रवृत्तंप्रत्यक्षमग्रेऽबल-
मेवबाध्यम्॥प्राबल्यवत्याचरम-
प्रवृत्त्याश्रुत्याह्यपच्छेदनयोक्त-
रीत्या॥१०१॥नन्वेवमप्यस्त्यनु-
मानबाधोऽभेदश्रुतेःसंयमिच-
क्रवर्तिन्॥[redacted]घटादिवद्ब्रह्मनि
रूपितेनभेदेनयुक्तोऽयमसर्ववि-
त्त्वात्॥१०२॥किमेषभेदःपरमा-
र्थभूतःप्रसाध्यतेकाल्पनिकोऽथ-

वाऽऽद्ये ॥ दृष्टान्तहानिश्चरमेनुवि-
ङ्क्भूरीकृतोऽस्माभिरसाधनीयः
॥१०३॥ स्वप्रत्ययाबाध्यभिदाश्रय-
त्वंसाध्यं घटादौचतदस्तियोगिन् ॥
त्वया[redacted]ऽऽत्मबोधेनभिदानबाध्ये-
त्यनभ्युपेतेतिनकोऽपिदोषः॥१०४॥
ननुस्वशब्देनसुखादिमान्चावि-
वक्षितस्तद्धिधुरोऽयवाऽऽत्मा॥
ऽऽद्येऽस्मदिष्टंनतुसाध्यमन्त्ये-
दृष्टान्तहानिःपुनरेवतेस्यात् ॥
॥१०५॥ योगिन्ननौपाधिकभेद-
वत्त्वं विवक्षितंसाध्यमिहत्वदि-
ष्टः॥ ऽऽौपाधिकस्त्वीश्वरजीव-
भेदोघटेशाभेदोनिरुपाधिकश्च
॥१०६॥ घटेशभेदेऽप्युपधिर्ह्यो
विद्यातवानुमानेषुजडत्वमेव ॥

च्चित्वादभिन्नः परवत्परस्मादात्मे-
तिवाऽप्रतिपक्षहेतुः ॥१०७॥ ध-
र्मिप्रमाबाध्यशरीरिभेदो ह्यसंसृतौ
ब्रह्मणि साध्यमिष्टम् ॥ त्वयेष्यते
ब्रह्मधियाऽऽत्मभेदो बाध्यो घटा-
दिप्रमयात्वबाध्यः ॥१०८॥ किंकृ-
त्स्नधर्मिप्रमयानबाध्यः किंवा-
स्य यत्किंचनधर्मिबोधात् ॥
घटादिके ब्रह्मणि चाऽऽत्मभेदस्यै-
क्यात्पुनः स्यान्ननु पूर्वदोषः ॥१०९॥
किंचागुणो वा सगुणो मनीषि-
न्विवक्ष्यते धर्मिपदेन नान्यः ॥
भेदस्य तद्बुद्ध्य निबाध्यतेष्टे-
नीऽऽद्यश्च तत्रोभयथाऽपिदोषा-
त् ॥११०॥ किंनिर्विशेषं प्रमितं नवा-
ऽन्त्येप्राप्ताऽऽश्रयासिद्धिरथाऽद्य-

कल्पे॥ शरीर्यभेदेन परस्य सिद्धेः
प्राप्नोति धर्मिग्रहमानकोपः॥१११॥
मोद्वासुपर्णा सयुजा सखायेत्या-
द्या श्रुतिर्भेदमुदीरयन्ती॥ जीवे-
शयोः पिप्पलभोक्त्रभोक्त्रो-
स्तयोरभेदश्रुतिबाधिकाऽस्तु
॥११२॥ प्रत्यक्षसिद्धे विफले परा-
त्मभेदे श्रुतिर्नो नयवित्प्रमाणम्॥
स्यादन्यथा मानमतत्परोऽपि
स्वार्थेऽर्थवादः सकलोऽपि विद्व-
न्॥११३॥ स्मृतिप्रसिद्धार्थविबो-
धिवाक्यं यथेष्यते मूलतया प्र-
माणम्॥ प्रत्यक्षसिद्धार्थकवाक्य-
मेवं स्यादेव तन्मूलतया प्रमाण-
म्॥११४॥ श्रुतिः स्मृतेऽर्थे यदि-
वेदविद्भिर्भवेन्न तन्मूलतया प्रमा-

णम्॥कथंभवेद्भेदकथानभिज्ञैर्ज्ञा-
तेऽपिभेदेपरजीवयोःसा॥११५॥
जीवेश्वरौसावदतीत्युपेत्येप्रावो-
चमेतत्परमार्थतस्तु॥विविच्य
सत्त्वात्पुरुषंसमस्तसंसाराहि-
त्यममुष्यवक्ति॥११६॥यदीयमा-
ख्यात्ययसत्त्वजीवौविहायसर्व-
ज्ञशरीरभाजौ॥जडस्यभोक्तृत्व-
मुदाहरन्तीप्रामाण्यमर्हन्कथ-
मश्नुवीत॥११७॥नचोदनीयाव-
यमत्रविद्भन्यतस्त्वयापैङ्ग्यर-
हस्यमेव॥प्रात्तीतिसत्त्वंत्वभि-
पश्यतिज्ञइतिस्मसम्यग्विवृणो-
तिमन्त्रम्॥११८॥शारीरवाची
ननुसत्त्वशब्दःक्षेत्रज्ञशब्दःपर-
मात्मवाची॥तत्राप्यतोनान्यपर-

त्वमस्यवाक्यस्यपैङ्ग्योदितव-
र्त्मनाऽपि ॥११९॥ तदेतदित्यादि-
गिराहिचित्ते प्रदर्शितासत्त्वपद-
स्यवृत्तिः ॥ क्षेत्रज्ञशब्दस्यचवृ-
त्तिरुक्ताशारीरकेद्रष्टरितत्रवि-
द्धन् ॥१२०॥ येनेति हि स्वप्नदृशि-
क्रियायाः कर्तोच्यतेतत्रसजीव-
एव ॥ क्षेत्रज्ञशब्दाभिहितश्चयो-
गिन्स्यात्स्वप्नदृक्सर्वविदीश्व-
रोऽपि ॥१२१॥ तिङ्प्रत्ययेनाभि-
हितोऽत्रकर्ताततस्तृतीयाकरणे-
ऽभ्युपेया ॥ द्रष्टाचशारीरतया-
मनीषिन्विशेष्यतेतेनसनेश्व-
रः स्यात् ॥१२२॥ वृत्तिः शरीरेभ-
वतीत्यमुष्मिन्नर्थेहिशारीरप-
दस्ययोगिन् ॥ तस्मिन्भवन्सर्व-

गतो महेशः कथं न शारीरपदाभि-
धेयः ॥१२३॥ भवञ्शरीरादितर-
त्र चेशः कथं न शारीरपदाभिधे-
यः ॥ नभः शरीरेऽपि भवत्यथापि-
नकेऽपि शारीरमतीरयन्ति ॥१२४॥
यद्येष मन्त्रोऽनभिधाय जीवप्रा-
ज्ञौ वदेद् बुद्धिशरीरभाजौ ॥ कर्त्री-
ति भोक्तृत्वमचेतनाया बुद्धेर्वदे-
त्तर्हि कथं प्रमाणम् ॥१२५॥ पादा-
हकस्याप्ययसः कृशानोराश्ले-
षणाद्दाहकता यथाऽऽस्ते ॥ तथै-
व भोक्तृत्वमचेतनाया बुद्धेरपि-
स्याच्चिदनुप्रवेशात् ॥१२६॥ ध्या-
यात पीयद्वदतीव भिन्नो जीवेश्व-
रौ तद्वदिति ब्रुवाणा ॥ ऋतं पिब-
न्ताविति काष्ठकेषु श्रुतिस्त्वभे-

दश्रुतिबाधिकाऽस्तु ॥१२७॥
भेदं वदन्ती व्यवहारसिद्धं न बाध-
तेऽभेदपरश्रुतिं सा ॥ एषा त्वपूर्वा-
र्थतया बलिष्ठा भेदश्रुतेः प्रत्युत-
बाधिका स्यात् ॥१२८॥ मानान्त-
रोपोद्बलिता हि भेदश्रुतिर्बलिष्ठा-
यमिनां वरेण्य ॥ तद्बाधितुं साप्र-
भवत्यभेदश्रुतिं प्रमाणान्तरबा-
धितार्थाम् ॥१२९॥ प्राबल्यमा-
पादयति श्रुतीनां मानान्तरं नैव-
बुधाग्रयायिन् ॥ गतार्थतादान-
मुखेन तासां दौर्बल्यसंपादकमे-
व किंतु ॥१३०॥ इत्यास्थाय दृढयुक्ति-
रस्य शुशुभे दत्तानुमोदा गिरां
देव्या तादृशविश्वरूपरभसाव-
ष्टम्भमुष्टिंधया ॥ भर्तृन्याम-

विलक्ष्यसूक्तिजननीसाक्षित्व-
कुक्षिंभरिः सश्लाघाद्भुतपुष्प
वृष्टिलहरीसौगन्ध्यपाणिंध-
या ॥१३१॥ इत्थंयतिक्षितिपतेर
नुमोद्ययुक्तिंमालांचमण्डन
गलेमलिनामवेक्ष्य ॥ भिक्षार्थ-
मुच्चलतमद्ययुवामितीमावा-
चष्टतंपुनरुवाचयतीन्द्रमम्बा
॥१३२॥ कोपातिरेकवशतःश-
प्तापुरामांदुर्वाससातदवधि-
र्विहितोजयस्ते ॥ साऽहंयथाग-
तमुपैमिशमिप्रवीरेत्युक्त्वास-
संभ्रममसुंनिजधामयान्तीम्
॥१३३॥ बबन्धनिःशङ्कमरण्य-
दुर्गामन्त्रेणतांजेतुमनामुनीन्द्रः ॥
जयोऽपितस्याःस्वमतैक्यसिद्धै-

सार्वज्ञतः स्वस्य नमानहेतोः ॥१३४॥
जानामि देवीं भवतीं विधातुर्देव-
स्य भार्यां पुरभित्सगर्भ्याम् ॥
उपात्तलक्ष्म्यादिविचित्ररूपां
गुप्त्यै प्रपञ्चस्य कृतावतारम् ॥
॥१३५॥ अजजननि तदा त्वं भक्त-
चूडामणिस्त्ते निजपदमनुदास्या-
म्यस्यनुज्ञां यदेतुम् ॥ इति निज-
वचनेऽस्मिञ्छारदासंमतेऽसौ
मुनिरथमुदितोऽभून्मण्डनं ह्यु-
द्बुभुत्सुः ॥१३६॥ इति श्रीमाध-
वीये तन्मण्डनार्थकथापरः ॥
संक्षेपशंकरजये सर्गोऽसाव-
ष्टमोऽभवत् ॥ १३७ ॥ ८ ॥

॥ ॐ ॥

॥ श्रीगणेशाय नमः ॥

तस्मादस्मत्कल्पितेष्वर्च्यमा-
ना स्थानेषु त्वं शारदाख्या दि-
शन्ती ॥ इष्टानर्थान्नृष्यशृङ्गादि-
केषु क्षेत्रेष्वास्स्वमाप्तसत्सं-
निधाना ॥ ७१ ॥ तथेति संश्रुत्य
सरस्वती सा प्रायात्प्रियं धाम-
पितामहस्य ॥ सुदर्शनं तत्र स-
मीक्ष्य सर्वे ह्याकस्मिकं विस्मय-
मीयुरुच्चैः ॥ ७२ ॥ तस्या यती-
शजितभर्तृयतित्वजात वैधव्य-
संभवशुचाभुवमस्पृशन्त्याः ॥
अंतर्धिमेक्ष्य मुदितोऽजनि म-
ण्डनोऽपि तत्साधु वीक्ष्य मुमु-
दे यतिशे[illegible]खरश्च ॥ ७३ ॥ मण्ड-

नमिश्रोऽप्यथ विधिपूर्वं दत्त्वा-
वित्तं यागेसर्वम् ॥ आत्मारोपित-
शोचिष्केशो भेजे शंकरमस्त-
मिताशः ॥७४॥ संन्यासगृह्य-
विधिना सकलानि कर्माण्यह्ना-
य शंकरगुरुर्विदुषोऽस्य कुर्वन्
॥ कर्णे जगौ किमपि तत्त्वमसी-
ति वाक्यं कर्णेजपं निखिलसं-
सृतिदुःखहानेः ॥७५॥ संन्या-
सपूर्वं विधिवद्विभिक्षे, पश्चा-
दुपादिक्षदयाऽऽत्मतत्त्वम् ॥ आ-
चार्यवर्यः श्रुतिमस्तकस्थं, तदा-
दिवाक्यं पुनराबभाषे ॥७६॥
त्वं नासि देहो घटवद्दृश्यनात्मा
रूपादिमत्त्वादिह जातिमत्त्वा-
त् ॥ ममेति भेदप्रथनादभेद

संप्रत्ययं विद्धि विपर्ययोत्थम्॥
॥७७॥ लोप्यो हि लोप्यव्यति-
रिक्तलोपको दृष्टो घटादिः
खलु तादृशी तनुः॥ दृश्यत्वहेतो-
र्व्यतिरेकसाधने त्वत्तः शरीरे
कथमात्मतागतिः॥७८॥ नापी-
न्द्रियाणि खलु तानि च साध-
नानि दात्रादिवत्कथममीषु त-
वाऽऽत्मभावः॥ चक्षुर्मदीयमिति
भेदगतेरमीषां स्वप्नादिभावबि-
रहाच्च घटादिसाम्यक्॥७९॥
यद्यात्मतैषां समुदायगास्या
देकव्ययेनापि भवेन्न तद्धीः॥ प्र-
त्येकमात्मत्वमुदीर्यते चेन्नश्ये-
च्छरीरं बहुनायकत्वात्॥८०॥
आत्मत्वमन्यतमगं यदि चक्षु-

रादे श्चक्षुर्विनाशसमये स्मरणं
नहि स्यात् ॥ एकाश्रयत्वनियमा-
त्स्मरणानुभूत्यो र्दृष्टश्रुतार्थवि-
षयावगतिश्च न स्यात् ॥ ८१ ॥
मनोऽपि नाऽऽत्मा करणत्वहेतो
र्मनोमदीयं गतमन्यतोऽभूत् ॥
इतिप्रतीतेर्व्यभिचारितायाः सु-
प्तौ च तच्छिन्मनसो र्विविक्तता ॥
॥ ८२ ॥ अनयैव दिशा निराकृता
न च बुद्धेरपि चाऽऽत्मता स्फुट-
म् ॥ अपिभेदगतेरनन्वयात्कर
णादाविव बुद्धिमुज्झ भोः ॥ ८३ ॥
नाहंकृतिश्चरमधातुपदप्रयोगा-
त्प्राणा मदीयादृति लोकवादा-
त् ॥ प्राणोऽपि नाऽऽत्मा भवितुं
प्रगल्भः सर्वोपसंहारिणि सन्सु-

णुते ॥८४॥ स्वं शरीराद्यविवि-
क्त मात्मा त्वंशब्दवाच्योऽभि-
हितोऽत्र वाक्ये ॥ तदोदितं ब्रह्म
जगन्निदानं तथा तयैक्यं पद-
युग्मबोध्यम् ॥८५॥ कथं तदै-
क्यं प्रतिपादयेद्वचः सर्वज्ञ संमू-
ढपदाभिषिक्तयोः ॥ न ह्येकता-
संतमसप्रकाशयोः संदृष्टपूर्वा
न च दृश्यतेऽधुना ॥८६॥ सत्यं
विरोधगतिरस्ति तु वाच्यगेयं
सोऽयं पुमानिति वदत्र विरोध-
हानेः ॥ आदाय वाच्यमविरोधि
पदद्वयं तल्लक्ष्यैकबोधनपरं
ननु को विरोधः ॥८७॥ जहीहि
देहादिगतामहंधियं चिरार्जितां
कर्मशठैः सुदुस्त्यजाम् ॥ विवेक-

बुद्ध्या परमेव संततं ध्याया-
ऽऽत्मभावेन यतो विमुक्तता ॥
॥८८॥ साधारणे वपुषि काक-
सृगालवह्नि मात्रादिकस्य म-
मतां त्यज दुःखहेतुम् ॥ तद्वज्ज-
हीहि वहिरर्थगतां च विद्धि चि-
त्तं बधान परमात्मनि निर्विशा-
ङ्कम् ॥८९॥ तीरात्तीरं संचरन्दी-
र्घमत्स्यस्तीराद्भिन्नो लिप्यते
नापि तेन ॥ एवं देही संचरञ्जा-
ग्रदादौ तस्माद्भिन्नो नापि तद्ध-
र्मको वा ॥९०॥ जाग्रत्स्वप्नसुषु-
प्तिलक्षणमदोऽवस्थात्रयं चि-
त्तको त्वय्येवानुगते मिथो व्य-
भिचरद्भीसंभ्रमज्ञानतः ॥ क्लृप्तं
रज्जिवदमंशके वसुमतीच्छिद्रा-

हि दण्डादिव तद्बहिरसि तुरीय-
मुज्झितभयं मा त्वं पुरेव भ्रमीः
॥८१॥ प्रत्यक्क्रमं परपदं विदुषो-
ऽन्तिकस्थं दूरं तदेव परिमूढमते-
र्जनस्य॥अन्तर्बहिश्च चितिरस्ति-
न वेत्ति कश्चिच्चिन्वन्बहिर्बहिर-
हो महिमात्मशक्तेः॥८२॥यथा
प्रपायां बहवो मिलन्ते क्षणे
तृतीये बत भिन्नमार्गाः॥प्रयान्ति
तद्वद्बहुनामसमाजो गृहे भवन्त्यत्र-
न कश्चिदन्ते॥८३॥सुखाय यद्य-
त्क्रियते दिवानिशं सुखं न किं-
चिद्बहु दुःखमेव तत्॥विना न हेतुं
सुखजन्म दृश्यते हेतुश्च हेत्वन्त-
रसंनिधौ भवेत्॥८४॥परिप-
क्वमतेः सकृच्छ्रुतं जनयेदात्म

धियं श्रुतेर्वचः॥ परिमन्दमतेः
शनैः शनैर्गुरुपादाब्जनिषेवणा-
दिना॥८५॥ प्राणवाम्यसनोक्त-
कर्मणोः करणे नापि गुरोर्निषेव-
णात्॥ प्रपगच्छति मानसं मलं
क्षमते तत्त्वमुदीरितं ततः॥८६॥
मनोऽनुवर्तेत दिवानिशं गुरो
गुरुर्हि साक्षाच्छिव एव तत्त्ववि-
त्॥ निजानुवृत्त्या परितोषितो-
गुरुर्विनेयवक्त्र कृपया हि वी-
क्षते॥८७॥ सा कल्पवल्लीव नि-
जेष्टमर्थं फलत्यवश्यं किमका-
र्यमस्याः॥ आज्ञा गुरोस्तत्परि-
पालनीया सा मोदमानीय विधा-
तुमिष्टा॥८८॥ गुरूपदिष्टा
निजदेवता चेत्कुप्येत्तदा पाल-

यिता गुरुः स्यात्॥ रुष्टे गुरौ पा-
लयिता न कश्चिद्गुरौ न तस्मा-
ज्जनयेत कोपम्॥९९॥ पुमान्पु-
मर्थं लभतेऽपि चोदितं भजन्नि-
वृत्तः प्रतिषिद्धसेवनात्॥ विधिं
निषेधं च निवेदयत्यसौ गुरो-
रनिष्टच्युतिरिष्टसंभवः॥१००॥
प्रार्थितं दैवतमिष्टमर्थं ददा-
तितस्याधिगमो गुरोः स्यात्॥
नोचेत्कथं वेदितुमीश्वरोऽय-
मितीन्द्रियं दैवतमिष्टदं नः॥
॥१०१॥तुष्टे गुरौ तुष्यतिदेवता-
गणो रुष्टे गुरौ रुष्यति देवता-
गणः॥ सदाऽऽत्मभावेन सदा-
त्मदेवताः पश्यन्नसौ विश्वमयो-
हि देशिकः॥१०२॥सर्वं पुराण-

गुरुणा परमात्मतत्त्वं शिष्योगु-
रोश्चरणयोर्निपपात तस्य ॥ ध-
न्योऽस्म्यहं तव गुरो करुणाकटा-
क्ष पातेन पातिततमा इति भा-
षमाणः ॥१०३॥ ततः समादिश्य
सुरेश्वराख्यां दिगङ्गनाभिः
क्रियमाणसख्याम् ॥ सच्छिष्य-
तां भाष्यकृतश्चमुख्या मवाप
तुच्छीकृतधातृसौख्याम् ॥१०४॥
निखिलनिगमचूडाचिन्तया
हन्त यावत्स्वमनवधिकसौख्यं
निर्विशन्निर्विशङ्कम् ॥ वहुतिथ-
मभितोऽसौ नर्मदां नर्मदां तां
मगध भुवि निवासं निर्ममे
निर्ममेन्द्रः ॥१०५॥ इति वशीकृ-
तमण्डनपण्डितः पणतसत्कर-

णत्रयदण्डितः॥ सकलसद्गुण-
मण्डलमण्डितः सनिरागात्कृत-
दुर्मतखण्डितः ॥१०६॥ कुसुमि-
तविविधपलाशभ्रमदलिकु-
लगीतमधुरस्वनम् ॥ पश्यन्वि-
पिनमयासीदाशांकीनाशपा-
लितासेवः ॥१०७॥ इति ॥

(ॐ)

॥श्रीगणेशायनमः॥

दृष्ट्वाकाशीपुरींभिक्षुस्तुष्टाव-
शिववल्लभाम्॥ स्तोत्रेणानेन-
मेधावीयच्छ्रुत्वाशिव[redacted]-
तामियात्॥८६॥शिवाकारांदे-
वींहरिहरनिजावासधरणींभवो-
च्छेदश्रींब्रह्माद्वयसुखपदध्वांत-
हरिणीम्॥शरण्यांभूतानांज-
निमृतिभयग्रस्तमनसांधिया-
वंद्यांवंदेसततमिहकाशींस्थि-
रपदाम्॥८७॥पुरंस्थूलंसूक्ष्मं-
प्रकृतिमखिलाध्यासजननींपु-
रींत्यक्तुंलोकःश्रयतिभवतींशां-
तिनिबिडाम्॥पुरींब्रह्माभिख्यां-
निरवधिचिदानंदसरणिंसुर-

प्रार्थ्यांनित्यंभगवतिभजेत्वांशि-
वसुधाम्॥९८॥क्रतूनांतीर्थानां-
प्रबलतपसांशास्त्रविधिनाप्रक-
तीरेलोकेत्वयियदिनिवासंसु-
कृतिनः॥लभंतेतेधीराःप्रचुर
शुभलभ्यंसपदितेप्रविष्टाःसौ-
ख्याब्धौविमलपदमोक्षेऽप्य-
सुलभे॥९९॥स्वयंभूःसृष्ट्वेदं-
मुनिसुरनराद्यन्वितमसौसुखो-
पायंदुःखापहृतिकरणंवीक्ष्यज-
गताम्॥तपस्तीर्थाद्येवंसुखक-
रमघादिक्षयकरंविनिर्मायांते-
त्वांजनिमृतिहरांशांतिमगमत्
॥१००॥पुराध्यायंध्यायंशिवप-
दविधात्रींस्वहृदयेधियाकाशीं-
गंगाजलकृतविभूषांहरिहरौ॥

निवासार्थं भूमी परमकृपया मो-
क्षजननीं जनानां त्वां सृष्ट्वा स्वय-
मपि निवासं विदधतु॥१॥ हरि-
ब्रह्मा शंभुर्गुहगणपमुख्याः शि-
वगणाः शिवालक्ष्मीर्वाणी नि-
जनिजगणैः संपरिवृताः॥ग्रहा-
देवा यक्षा ऋषिमुनिगणास्त्वां
शिवपुरीं समासाद्याद्यापि त्वयि
कृतनिवासाः स्पृहयिणः॥२॥
कलौ नष्टे धर्मे वृजिनगणयुक्तो
नरगणः पुरा जन्माभ्यस्तैः सुकृ-
तशतपुंजैः प्रभवतीम्॥ समाश्रि-
त्यां तेत्वा त्यजति तनुमां ध्याव-
कलितां शिवो भूत्वा ब्रह्माद्वयसु-
खपदं संप्रविशति॥३॥ अहो भा-
ग्यं नृणां स्थिरचरकलानां जनि-

मन्तांकृत्वौकाश्यांवासःशिवप-
दगतिःसज्जनगतिः॥सदागांगा-
पाथोऽमृतरसरसास्वादनरतिः
प्रयाणेसन्मोक्षःश्रुतिशिखरवेद्यो-
ऽतिसुलभः॥४॥इदंस्तोत्रंकाश्या-
विधिहरिशिवास्वादितरतेःस-
दानंदावाप्तेर्भवशमनसंरक्तसु-
मतेः॥पठन्भक्त्यारुद्रावसतिव-
सतिंप्राप्यविमलांसुरालभ्यांशं-
भोःपरमपदवींयान्तिसुजनः॥५॥
एवंस्तुत्वायतीन्द्रेशःकाशींभ-
क्त्याप्रणम्यच॥गंगांभागीरथीं-
प्राप्यतांतुष्टावततोऽमुना॥६॥

(ॐ)

ॐशिवाशान्ताशीतांहरिपद-
यशोभूतिरतुलास्वयंज्योतिर्ली-

क्ष्मीर्निरवधिसुखस्वादुमधुरा
॥सुधाधारासारा त्रिगुणपरिवा-
रातिविमला चिदानंदाकारा व-
सतु मम चित्ते त्रिपथगा॥७॥नि-
राकारा सृष्टेरभवदियमीशात्म-
नि पुरा जगत्सृष्ट्वा देवासुरनरमु-
खं भ्रांतिनिबिडम्॥ निमग्नं दुःखा-
ब्धौ दुरितरचिते वीक्ष्य कृपया-
समुद्धर्तुं नीराकृतिमिह विधाया-
विरभवत्॥८॥स्वयं शुद्धा संवि-
त्प्रकृतिपुरुषेशाकृतिरजा त्वमा-
त्माभूतानां परिमिततनूनां जनि-
मताम्॥ निजां शक्तिं चित्रां स्थि-
रचरजगद्धेतुमुचितां प्रविश्ये-
दं सर्वं नियमयसि भागीरथि स-
ति॥९॥विधिर्विष्णुः शंभुस्त्वम-

सिपुरुषत्वेनसकलारमोसारी-
मुख्यास्त्वमसिललनाजन्हुज-
नये॥निराबाधागाधाभगवति-
सदात्वंविहरसिक्षितौनीराका-
राहरसिजनतापान्स्वकृपया
॥१०॥त्रिधाभूत्वागांगोदिविभु-
विचपातालभुवनेसुराभूनना-
गादीन्निजजलगानाप्लावयसि-
यान्॥विशुद्धास्तेभूत्वासुरनर-
भुजंगप्रभृतयःसुखंब्रह्मांडं
निरवधिपदंयांतिसुभगाः॥११॥
प्रसिद्धातेकीर्तिर्भवजलधिपा-
रंगमयतिस्मृतौवेदेलोकेवृजि-
नहरणीशांतिसरणिः॥प्रतोऽहं-
स्वामित्वांशरणमभयेमोक्षजन-
निभयत्याप्रान्त्योऽस्मिप्रसव-

स्मिसमुद्धारयशसा॥१२॥दुरुद्धा-
राचौचेप्रचुरभयदेऽब्धौप्रपति-
तस्तवांबुस्नानेनत्यजतिमल-
मत्यंतगहनम्॥प्रचण्डंमाया-
ख्यंजनिमृतिभयागारं[illegible]मज-
रंनिजानन्दंधामप्रविशतिज-
नस्तेंऽबकृपया॥१३॥नयज्ञैर्नो-
दानैर्नचपरतपोभिर्ननिगमैः
समुच्छेदोयेषांकलिमलभरा-
णामसुमताम्॥समुच्छेदस्तेषां-
तवसलिलधारेक्षणवशात्सदा-
स्नानैःपानैःकिमुतजननीऽद्यां-
बुनइति॥१४॥शुचिःप्रातःकाले-
पठतियदिदंस्तोत्रममलंपवि-
त्रंगंगायाःशिवपदवहायाभ्रमह-
रम्॥हृदाध्यायन्नांगांभवभयभ-

रध्वंसिभुवनांविनिर्धूयाघौघा-
न्व्रजतिहरिधामामृतमजम॥१५॥
एवंभागीरथींस्तुत्वानत्वासात्वा-
यतीश्वरः॥सर्वलोकसुखावासं
ययौविश्वेश्वरालयम॥१६॥

(ॐ)

विश्वेश्वरंसमभ्यर्च्यमनसास्वा-
त्मरूपिणम॥स्तोत्रेणानेन[redacted]-
तुष्टावशंकरंशंकरःस्वयम॥१७॥
ॐशिवंशांताकारंभवमृतिजरा-
शून्यममृतंनिरीहंस्वच्छाच्छं-
विगतकलनंध्वांतविधुरम॥
उमाश्लिष्टंशंभुंभ्रमहरमजेंद्रा-
दिशरणंमहेशानंवंदेश्रुतिशि-
खरवाग्भूमिमकलम॥१८॥
अधीत्यादौवेदान्क्रतुभिरम-

रेशंकऋतुपतिंमहेशंत्वासिष्ट्वा-
विमलमतयोभोगविमुखाः॥
निरुध्यासून्शांतायमनियम-
मुख्याध्वनिरताहृदात्वांध्या-
यंतोनिरवधिपदंयांतिसुभगाः
॥१८॥मनुष्यत्वंप्राप्यापरिमि-
तसुखद्वारमवुधामहादेवंहित्वा-
भ्रमरशातवृत्ताभोगचतुराः॥भ्रजं
त्वांध्यादांध्यक्कचिदपिनशांतिं
स्थिरपदांविचार्यैवंधीराःपशु-
पतिसमाराधनपराः॥२०॥तवा-
खण्डैश्वर्यंविधिहरिमुखाप-
ध्यमचलंप्रपंचंसृष्ट्वादावव-
तिहरतिस्वात्मनिपरे॥तदज्ञा-
नाल्लोकोभ्रमतिकिलदुःखाब्धि-
पतितोबुधाबुद्धानित्यंतवपद-

युगांभोजनिरताः॥२१॥ महामो-
हाध्यस्तेऽनृतजडपरिक्लेशव-
पुषि निसारे संसारे विगतसुख-
लेशेऽतिनिरये नि[redacted]मग्ना-
नां नृणां त्वमसि शरणं शंकर-
विभो प्रपद्ये त्वां शंभो परिहर
भवं दुःखनिबिडम्॥२२॥ ऋते
त्वामीशानं त्रिनयनमुदारात्म-
वपुषं न पश्यामीड्यं चेत्क्वचिद-
पि शरण्यं भवहरम्॥ शिवं स्वा-
त्माभिन्नं श्रुतिशतशिरोभिः
प्रकटितं विचार्याहं नाथप्रणव-
वपुषं त्वामुपगतः॥२३॥ पुनादौ-
संसारेऽज्ञनिभृतिभये त्वां स्वसु-
हृदं प्रभुं स्वात्मारामं परमकृपया-
ऽलंकृततनुम् शरण्यं त्वां लोकोऽ-

यंजडमतिरत्तिभ्रांतिवशगोन-
काशीशंयातीश्वरशरणमेका-
न्तसुखदम्॥२४॥कईष्टेत्वांस्तो-
तुंशतधृतिगिरामप्यविषयं-
निरालंबंशुद्धंप्रकृतिपुरुषेशं-
मृडमजम्॥तथापित्वत्पादेव-
चनकुसुमैःपूजनमिदंसुखा-
राध्येध्येयेभवतुममशंभो-
श्रमहरे॥२५॥एवंस्तुत्वामहा-
देवंविश्वेश्वरमुदारधीः॥
अन्नपूर्णालयंगत्वातांतुष्टा-
वस्तवेनसः॥२६॥

(ॐ)

शिवांशंकरस्यार्धदेहांविशु-
द्धांजगन्मातरंशंभुलक्ष्मीमु-
दाराम्॥नियंत्रींसमस्तस्य-

विश्वस्यकर्त्रीं खलानां निहंत्रीं
प्रपद्येऽन्नपूर्णाम् ॥२७॥ पुरायाद्वि-
तीयाचिदानंदरूपा स्वयंब्रह्मश-
ब्दाभिधेयाक्षरासीत् । विधायां-
डहेतुं स्वशक्तिं विचित्रां ससर्जा-
खिलं विश्वमाकाशमुख्यम् ।
॥२८॥ पुनर्ब्रह्मविष्ण्वीशमुख्या-
भिधानास्थितीवाङ्मुखायाम-
तीतास्त्रिलोक्याम् ॥ सुराद्याकृ-
तिं स्वं विनिर्माय शक्त्या विभ-
र्तीश्वरीं तां प्रपद्येऽन्नपूर्णाम् ।
॥२९॥ नया स्त्रीपुमान्नो न षंढाकृति-
र्यास्वयं सर्वरूपासतीभासमा-
ना ॥ स्वयंज्योतिरेषो विजृंभतारू-
पजालैः सदा तां भवानीं प्रपद्ये-
ऽन्नपूर्णाम् ॥३०॥ दुरुद्धारसंसा-

रवाब्धौ निमग्नं समीक्ष्याखिलं
जीवजालं दयार्द्रा विधाय वि-
मुक्तात्मतां या प्रयाणे जनोद्धारि-
णीं तां प्रपद्येऽन्नपूर्णाम् ॥ ३१ ॥
कलौ या विमुक्तिं ददाति प्रया-
णे नरेभ्यः पशुभ्यः कृमिभ्यः
स्थिरेभ्यः ॥ स्वयं ब्रह्मविद्या सती
काशिकायां महेशप्रियां तां प्रप-
द्येऽन्नपूर्णाम् ॥ ३२ ॥ न येषां तपो-
योगयज्ञादिकर्माश्रयो नैव बो-
धो विरागादिनांतः ॥ गतिर्या-
हि तेषां प्रयाणे विमुक्ते शिवा तां
सदाहं प्रपद्येऽन्नपूर्णाम् ॥ ३३ ॥
अहो दुर्लभां मोक्षलक्ष्मीं विशा-
लामुपेक्षेत कोऽज्ञाविवेक्यात्-
र्मसिद्धिम् ॥ स्वयं दीयमानां क-

लो शंभुपत्न्यापरित्यागमात्रेण-
देहस्यजन्तोः॥३४॥ नमस्तेशि-
वायैगिरीशप्रियायैसुखायैनिजा-
नन्ददात्र्यैमहत्यै॥ नमःप्रत्यगा-
त्मस्वरूपस्थितायैपरब्रह्मबोधो
दयायैसदास्तु॥३५॥ शिवांनील-
कण्ठप्रियांस्वात्मबुद्धौनिधाया-
न्नपूर्णालयेयुक्तचित्तः॥ स्तवंयः
पठेद्देवदेव्याः सदेमंप्रसन्नाभवेत्त-
स्यदेव्यन्नपूर्णा॥३६॥ गंगयालं-
कृतांकाशींप्राप्यगंगाव्यगाहत॥
तंप्रणम्यावगाह्यापतत्तीरेतस्थि-
वान्मुनिः॥३७॥ इतिशुभमस्तु॥

9